नित्यानि अकरणे प्रत्यवायसाधनानि· अपि· अपिना किमुतेत्यर्थकेन काम्यनिषिद्धयोरत्यन्तहेययोः परिहारः सर्वथैवादर्त्तव्य इति द्योतितम् । नित्यपदं नैमित्तिकप्रायश्चित्तयोरुपलक्षणम् । कर्म्माणि देहेन्द्रियमनोव्यापारैकसाध्यानि अनुष्ठानरूपाणि । शुद्धिवृद्धौ कामं यथेष्टं अभ्यस्यतोऽसकृदनुष्ठातुः पुरुषस्येतिशेषः । मुमुक्षोश्चित्तशुद्ध्यतिरिक्तप्रयोजनानपेक्षणाद्विति भावः। असत्कराणि अकिंचित्कराणि, मुक्तावपेक्षणीयस्य दृढस्यात्मबोधस्याविधेयरूपत्वात् क्रियायाश्च विक्षेपरूपत्वेन प्रत्युत तद्विरुद्धत्वात् । चित्तशुद्धेरपि विशुद्धसत्वं प्रत्यपुरुषार्थत्वाच्चेति भावः । यद्वा विद्याबाधितसत्ताकतया चित्तशुद्धेरप्यसत्यत्वेन यथाश्रुत एवार्थः । विद्यायास्तु सदद्वयानन्दप्राप्तिफलतया सत्करत्वमास्थेयमितिदिक् । स्यादेतत्· अकिंचित्करस्यापि नित्यस्य कर्म्मणः प्रत्यवायपरिहारः प्रयोजनमस्तीति कर्त्तव्यता श्रुतिसिद्धा नापह्नोतुमर्हा । भगवताऽपि चैतदेव' 'यज्ञदानतपःकर्म न त्याज्यं कार्य्यमेव तत्'' यज्ञो दानं तपश्चैव पावनानि मनीषिणा।'' मित्यादिना सप्रपञ्चं समर्थितम् । तत् कुतः कर्मत्यागो घटते इत्यतः साकूतमुत्तरयति, न्यक्कृत्येति । बोधं तत्त्वज्ञानं, न्यक्कृत्य गुणीकृत्य तिरस्कृत्येत्यर्थः । आयुःक्षेपाय एव· जीवनकालापक्षयाय एव प्रभवेयुः, तुमर्थे चतुर्थी, प्रशब्दः प्रकर्षे, तथाच प्रकर्षगत्याऽयुःक्षयं कर्त्तुम् एव भवेयुरित्यर्थः । ''यावज्जीवमग्निहोत्रं जुहोति,'' ''अहरहः सन्ध्यामुपासीत,'' ''दद्या दहरहः श्राद्धं पितॄणां प्रीतिमावहन्'' इत्यादि शास्त्रप्रयुक्त्या जातगर्द्धस्योपनीतकौशलस्य कर्म्माण्यभ्यस्यमानानि सत्यपि वैराग्ये त्रिपुटीपरिपाटीमेवोट्टंकयन्ते, तेन तत्त्वाभ्यासः खिलीकृतोऽसत्कल्प एवावतिष्ठमानो नापवर्गायालमिति मुमुक्षोरपि विगलितमुक्तिफलो जीवनकालः प्रलीयेतेति भावः । इति इत्येवं विमृश्य विचार्य्य, अह्नाय परित्यजेत् कर्म्माणीत्यादिः । ''किमेभिः कृतकैरकृतार्थप्रियंकरैः क्लेशजालजटिलैः कर्म्मभि'' रिति बुद्ध्वा तेभ्यो विरमेदित्यर्थः । अयमाशयः—रजस्तमोऽभिभूतं हि चित्तसत्त्वमर्वाक्स्रोतस्तया नालं तत्त्वग्रहणधारणाद्यभ्यसितुमिति स्ववर्णाश्रमोचित-नित्यनैमित्तिकप्रायश्चित्तानुष्ठानैः श्रद्धासमिद्धैर्यावत् सत्त्वशुद्धिं मुमुक्षुभिर्वर्त्तितव्यमेव । लब्धे च सत्त्वप्रकर्षे कृतार्थीभूतेषु तेषु तेषु कर्म्मसु फलाभावेन विगलिताभिलाषेषु अनवकुलत्वसमयक्षेपकत्वाविक्षेपकरत्वेन तत्त्वाभ्यासान्तरायरूपेषु जिहासाऽवश्यम्भावात्प्रत्यक्प्रवणतारक्षार्थमुपेक्षैव समुचिता भवति । नचैतावता दर्शितश्रुतिस्मृतिविरोधः शंकामधिरोहति । अविशुद्धसत्त्वान् प्रत्येव शास्त्रप्रवृत्तेः, अतएव च ''यदहरेव विरजेत्तदहरेव प्रव्रजेद्ब्रह्मचर्य्याद्वा गृहाद्वा वनाद्वेति'' तत्तदाश्रमविहितकर्म्मभ्यो व्युत्थानलक्षणा प्रव्रज्या श्रुत्यैवानुज्ञाता प्रतीयमाना संग-

च्छते। किंच ब्रह्मविदामपि "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते"। ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति" इत्यादिना भगवतैव प्रत्यवायप्रसक्तिनिराकरणाल्लौकिकसाधनपरतन्त्रकर्म्मत्यागस्तथाऽवस्थस्य न क्षतिमावहतीति। वस्तुतस्तु "तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादि श्रुतिर्ज्ञाने जिज्ञासायां वा कर्म्मोपयोगं विधत्ते न ज्ञानफलेऽपवर्गे, अनुपस्थितत्वादसम्भवाच्च । नहि मुक्तिः कर्म्मफलं भवितुमर्हति, निवृत्तिप्रसङ्गात्, कर्मणां विनाशिसातिशयफलत्वस्य प्रमाणसिद्धत्वात् । नापि ज्ञानं कर्म्मसमुच्चितमवकल्पते । विरोधात्, भेददर्शनपूर्विका हि क्रियाप्रवृत्तिर्न भेदनिह्नवे सम्भवतीति सर्वं चतुरस्रम् ॥ ३६ ॥

क्रमप्राप्तमुपरतेरुन्मथनमाह—पुनः पुनरिति ।

पं—विवरणम्—पुनःपुनःकर्म्मविपाकभुक्तयोऽवयुत्य संसारपदाभिधित्सिताः ।
दुरुत्तरत्वास्थिरताऽप्रधृष्यताः समर्थिताः सागररूपकाश्रयात् ॥३७॥

एतच्च संसारस्य प्रवाहानादिताख्यापनाय । साच स्वसजातीयध्वंसव्याप्यप्रागभावप्रतियोगित्वम्। व्याप्यत्वं चात्र कालिकं विवक्षितम्। तथाच कालसामान्ये यत्र व्यक्तिविशेषस्य प्रागभावस्तत्रावश्यं कस्यचिद्व्यक्त्यन्तरस्य विनाशो वर्त्तेत इत्यनादित्वमक्षतमित्यवधेयम्। कर्म्मविपाकभुक्तयः, कर्म्माणिच विपाकाश्च भुक्तयश्च, ताः, कर्म्माणि शुभाशुभसञ्चितानि आशयपर्य्यवसितानि, विपाकास्तत्तत्कर्म्मफलभूता जात्यायुर्भोगाः । भोगोऽत्र सुखदुःखाकारान्तःकरणवृत्तिरेव विवक्षितस्तेन पृथक्भुक्तिग्रहणं चिदात्मप्रतिविम्बलक्षणमुख्यभोगप्राप्त्यर्थमिति न व्यर्थमिति बोध्यम्। अवयुत्य मिलित्वा, तेन प्रत्येकं संसारपदवाच्यत्वं नेति ध्वनितम् । संसारपदाभिधित्सिताः, संसरति जीवराशिरमुनेति व्युत्पत्त्या संसारशब्दप्रतिपाद्याः इह संसारपदेन विवक्षिता इति यावत् । अत्रैत त्त्रकं प्रागुक्तषड्रचक्रस्योपलक्षणमिति न न्यूनतेत्यवधेयम् ।

उपरतिनिष्पत्त्यंगवैराग्यसिद्धये परममूले सागररूपककरणात्तन्नान्तरीयकमर्थज्ञातमाह—दुरुत्तरत्वेत्यादि । दुरुत्तरत्वं दुस्तरता, अस्थिरताऽचिरनिरोधशीलता। अप्रधृष्यता दुरवगाह्यता दुरतिक्रमणीयता दुरपेक्षणीयतेति यावत् । अत्र च प्रथमं विद्यासाधनोत्कर्षसंपिपादयिषाख्यापनार्थम्। द्वितीयं चालंप्रत्ययदार्ढ्यार्थम्, तृतीयं पुनर्विद्याया एकान्तापेक्षणीयतालाभार्थमित्यवधेयम् । सागररूपकाश्रयात् सागर एव रूपकः परत्र तादात्म्येनारोपविषय आरोप्यइति यावत् तस्याश्रय आश्रयणं, तस्मात् समर्थिताः, तेन हेतुना उपपादिता इत्यर्थः ।

तरिर्हि तस्येति—

व०—विवरणम्—तरिर्हि तस्य प्रतिकूलवर्त्तितां
व्यनक्ति तेनोपरतिः प्रदर्शिता ।
क्रियासमाप्ताविव वृत्तिसंततये
विशेषवृत्तेति न रिक्तमुच्यते ॥ ३८ ॥

तरिर्णिजुपसंहितस्तृधातुः तस्य यथोक्तलक्षणसंसारस्य, प्रतिकूलवर्त्तितां प्रतिपक्षस्वभावतां, व्यनक्ति बोधयति प्रतिकूलवर्त्तितामित्यत्र प्रतिकूलशब्दस्य योगाश्रयणात्प्रति प्रतीते अभिमुखे वा कूले वर्त्तत इति प्रतिकूलवर्त्ती, तस्य भावः तत्तामित्यर्थः प्रतीयते, समुदायवृत्त्या च प्रतिपक्षतया वर्त्तनमवगम्यत इति श्लेषबलेन तरिरेवाभिमतं व्यञ्जयति । तेन हेतुना, उपरतिः प्रदर्शिता आचार्य्येणेत्यादिः । सा च दर्शितदिशा क्रियासमाप्ताविव कर्मत्याग इव वृत्तिसंततये बहिरिन्द्रियव्यापारनिरोधे, अविशेषवृता निर्विशेषं प्रवृत्ते इति न रिक्तमुच्यते न निरर्थकं किंचित्प्रकृतेऽभिधीयते ऽस्माभिरित्यन्वयः । अयमर्थः—संतत्याऽऽवर्त्तमानानि किल कर्मादीनि संसारपदार्थः, तेषां पुनर्दुस्तरत्वादिसाधर्म्यदर्शनाद्युक्तमेव सागरत्वारोपकरणम्, णिजन्ततृधातुना लोडन्तेन तदुत्तारणप्रार्थनामुखेन च तेष्वेवानिष्टसाधनताबोधनात् तन्निवृत्तेर्मुमुक्षुपुरुषार्थत्वं सिध्यति । तथा च यथा सागरात्तारणं स्वाभिमुखकूलप्रापणम् तथा संसारात्तारणमिन्द्रियादिवृत्तिनिरोधसम्पादनं तच्च श्लेषवशेन विवरणे प्रतिपक्षभावनाकारितमित्यावेदितम् । साच प्रतिपक्षभावना पूर्वोक्ता विरोधिनी बुद्धिरितिनिरर्गलं निर्गलितमनेन यत्नेन दर्शितोपरतिद्वयोन्मथनमिति दिक् ॥ ३० ॥ ३८ ॥

(क्रमशः)

श्रीभाष्यम् ।

सटीकम् ।

(प्रथम खण्डस्य ४ ऽर्थसंख्यायाः २९९ पृष्ठतोऽनुवृत्तम्)

श्रोतव्यइति चानुवादः, स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात् तन्निर्णयाय स्वयमेव श्रवणे प्रवर्त्तेत इति श्रवणस्य प्राप्तत्वात्, श्रवणप्रतिष्ठार्थत्वात् मननस्य मन्तव्य इतिचानुवादः, तस्माद् ध्यानमेव

विधीयते । वक्ष्यति च "आवृत्तिरसकृदुपदेशाद्" इति । तदिदम् अपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते । विद्युपास्त्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनाद् "मनो ब्रह्मेत्युपासीत" इत्यत्र "भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद" "न स वेद अकृत्स्नो ह्येषः आत्मेत्येवोपासीत" "यस्तद्वेद" "यत् स वेद स मयैतदुक्त" इत्यत्र "अनु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति" । ध्यानं च,–तैलधारावदविच्छिन्नस्मृतिसन्तानरूपा ध्रुवा स्मृतिः" । "स्मृत्युपलम्भे सर्वग्रन्थीनां विप्रमोक्षः" इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात् । सा च स्मृतिर्दर्शनसमानाकारा "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इत्यनेनैकार्थ्यात् । एवं च सति "आत्मा वा अरे द्रष्टव्य" इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते । भवति च स्मृतेर्भावनाप्रकर्षात् दर्शनरूपता । वाक्यकारेणैतत् सर्वं प्रपञ्चितम्,–"वेदनमुपासनं स्यात् तद्विषये श्रवणादि"ति सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम्, "सकृत्प्रत्ययं कुर्य्यात् शब्दार्थस्य कृतत्वात् प्रयाजादिवद्" इति पूर्वपक्षं कृत्वा "सिद्धं तूपासनशब्दादि"ति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम् । "उपासनं स्याद् ध्रुवानुस्मृतिः दर्शनात् निर्वचनाच्च" इति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम् ॥

टी० । पूर्वं ज्ञानसामान्यवाचकशब्दानां वाक्यार्थज्ञानव्यावृत्तये विशेषज्ञानरूपध्यानपरत्वं व्याख्यातम् ; अत्रेयं आशङ्का जाता, भवतु सामान्यशब्दो विशेषपर्य्यवसायी, अत्र तु "आत्मा वाऽरे द्रष्टव्यः श्रोतव्य" इत्यादौ श्रवणस्य विधेयतया ज्ञानसामान्यवाचिनः शब्दाः श्रोतव्य इति श्रवणरूपज्ञानविशेषे पर्य्यवस्यन्तु, इत्यत आह,–"श्रोतव्य इतिं चे"ति । "च"कारः शङ्कानिवृत्तौ ; "विज्ञाय" "अनुविद्य" इतिवद् "श्रोतव्यः इत्ययमपि अनुवादः, न श्रवणं विधेयमित्यर्थः ॥ विज्ञायेत्यादिवत् श्रवणस्यापि अनुवाद्यत्वं संक्षेपेण उपपादयति,–"स्वाध्यायस्ये"ति स्वाध्यायशब्दवाच्यस्य वेदराशेरध्ययनानन्तरं तस्य प्रयोजनवदर्थस्य स्वर्गादेर्बोधकत्वं दृष्ट्वा तदर्थनिश्चयाय पुरुषः स्वयमेव–विधिम् अनपेक्ष्य अर्थतः प्राप्ते श्रवणे प्रवर्त्तते, अतः प्राप्तत्वात् न श्रवणस्य विधेयत्वमित्यर्थः । मनने कथं न विधिरित्यत आह,–"श्रवणप्रतिष्ठार्थत्वादि"ति । प्राप्तश्रवणस्य दृढत्वसाधनतया मननमपि प्राप्तमित्यर्थः । तस्मात् ध्यानमेव विधेयम् नतु वाक्यार्थज्ञानमित्यर्थः । उपासनस्य विधेयत्वं द्रढयितुं सूत्रकारोक्तिं दर्शयति,–"वक्ष्यति चे"ति । तत् सूत्रमुपादत्ते,–"आवृत्तिरि"ति । सूत्रे उपासनावाचकशब्दाभावेऽपि तस्य उपासनार्थत्वं स्फोटयति "तदिदमि"ति=तदिदमित्यनेन पूर्वाध्यायोक्तमोक्षफलकं ज्ञानं विवक्षितम् । अथवा–

"प्रज्ञां कुर्वीत" इत्यादिसामान्यशब्दोक्तं ज्ञानं असकृदावृत्तिरूपमुपासनमित्यर्थः । "आवृत्तिरसकृद्" इति सूत्रांशं व्याख्याय उपदेशादितिपदं व्याचष्टे,-"विद्योपास्त्यो"रिति । विद्योपास्त्योः व्यतिकरेण उपक्रमोपसंहारौ दर्शयति "मनो ब्रह्म"त्युदाहरणान्तरेण-"मनो ब्रह्मेत्युपासीत" इत्यत्र पूर्वसिद्धोपासनानुवादेन उपक्रमः "य एवं वेद" इति वेदनेनोपसंहारः । दानादिजन्या कीर्त्तिः विक्रमजन्यं च यश इत्यनयोर्भेदः । मनो ब्रह्मेतिवाक्यद्वये वेदनोपासनवाचकशब्दयोर्विप्रकर्षात् प्रकरणैक्यज्ञापनाय "इत्यत्र" इत्युक्तम् । "अनुम" इत्यत्र विविच्य ज्ञापनार्थेन अनुपूर्वेण शासिना उपक्रमः उपास्तिनोपसंहारः अनुशाधि=विविच्य ज्ञापयेत्यर्थः । "व्यवहिताश्च" इति सूत्रेण छन्दसि उपसर्गस्य व्यवहितप्रयोगः । "न स वेद" इत्यस्य "अथ योऽन्यां देवतामुपास्ते" इति उपास्तिना उपक्रमः । मध्ये "वेदन"शब्दः । "उपासीत" इति उपास्तिना उपसंहारः । "यस्तद्वेद" इत्यस्यायमर्थः, तस्य=ब्रह्मणो वेदिता यो रैक्वो नाम जानश्रुतिः, यद्वेद=तस्य रैक्वस्य वेद्यं यद् ब्रह्म, स=वेदिता रैक्वः एतद्=वेद्यं च, उभयं तव मयोक्तमित्यर्थः । एवं ज्ञानवाचकशब्दानां ध्यानपरत्वमुक्त्वा तत्र सूत्रकृत्सम्मतिर्दर्शिता । इदानीं पूर्वप्रकृतध्यानस्य ध्रुवानुस्मृतित्वमुपपादयति "ध्यानं च" इति । ध्यानं हि विजातीयप्रत्ययाव्यवहिता ध्रुवा स्मृतिर्भवति इत्यर्थः, एतेन ध्यानस्यापि विशेष उक्तः । अविच्छिन्नस्मृतिसंततित्वे वचनमाह "ध्रुवे"ति । स्मृतेर्ध्रुवत्वं हि विजातीयप्रत्ययान्तराव्यवहितसन्तानत्वम् । "अपवर्गोपायत्वश्रवणादि"ति=सूत्रे अपवर्गोपायभूतस्य वेदनस्य असकृदावृत्तिरुक्ता, अत्रापि तदुपायत्वप्रत्यभिज्ञानात् तस्या एव अविच्छिन्नस्मृतिसन्ततिरूपत्वं विवक्षितमितिभावः । ध्रुवानुस्मृतेर्दर्शनरूपता उच्यते "साचे"ति, न केवलं विषयस्य ऐक्यात् साम्यम् अपितु अपरोक्षरूपत्वेनापीति आकारशब्दस्यार्थः । हृदयस्य=मनसः । ग्रन्थयः=रागादयः । सर्वसंशयाः=संशयशब्देन विपर्ययोऽपि गृह्यते, अतो देहात्माभिमानादिरूपाविद्यादय इत्यर्थः । कर्माणि=पुण्यपापरूपाणीत्यर्थः "एवंच सति"=उपायभूतज्ञानस्य "तस्मिन्दृष्टे" इत्यनेन एकवाक्यतया दर्शनरूपत्वे सिद्धे सतीत्यर्थः । दर्शनसमानाकारतापन्नस्य ध्रुवानुस्मृतिरूपध्यानस्य मोक्षहेतुतया अवधारणात् अन्यत्रापि "आत्मा वाऽरे द्रष्टव्य" इत्यादौ ध्यानात्मकनिदिध्यासनस्यैव साक्षात्कारात्मकता विधीयते इत्यर्थः । ननु दर्शनं हि इन्द्रियजन्यं, स्मृतिश्च मनोजन्या, तत् कथमस्या दर्शनरूपता उच्यते इत्यत्राह,-"भवति चे"ति । भावना=वासना, दर्शनरूपता=दर्शनसमानाकारता ; उक्तार्थे सूत्रकृदभिप्रायविदां वृत्तिकाराणां वचनं प्रमाणयति, "वाक्यकारेणे"ति । "एतत् सर्वं"=सूत्रकारेण कण्ठत उक्तम् अभिप्रेतञ्च । प्रपञ्चितम्=पूर्वपक्षसिद्धान्तरूपेणोक्तम् ; अत्रार्थे वाक्यकारोक्तवचनचतुष्टयं एकैकशः उदाहृत्य व्याचष्टे "सर्वासूपनिषत्स्वि"ति न केवलं छान्दोग्ये इत्यर्थः । "मोक्षसाधनतया विहितं वेदन"मिति=अनुवाद रूपश्रवणादिव्यावृत्तिः । तत्र पूर्वपक्षवाक्यं "सकृत् प्रत्ययं कुर्यादि"त्यादि, पश्चात् "सिद्धमि"त्यादिसिद्धान्तदर्शनात् । यथा प्रयाजादीनां सकृदनुष्ठानेनैव शास्त्रार्थस्य कृतत्वात् न तदावृत्तिः एवं वेदनमपि सकृदेव कुर्यादिति पूर्वपक्षः । अत्र सिद्धान्तं दर्शयति

"सिद्धंत्वि"ति । "उपासनशब्दा"दित्येतद् व्याचष्टे वेदनमसकृदावृत्तमिति । वेदनस्य विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपत्वं सूत्रकाराभिप्रेतं वाक्यकारकथटोक्तम् दर्शयति "उपासनं स्यादि"ति । "दर्शनात्" = लोके प्रोषितभर्तृकादौ तथा दर्शनात् । निर्वचनात् = श्रुतिवाक्यात् । तस्यैव = मोक्षसाधनतया विहितस्य । असकृदावृत्तत्वे हेतुः "उपासनरूपस्ये"ति = यतः उपासनरूपम् अतः असकृदावृत्तमित्यर्थः । असकृदावृत्त ज्ञानं हि उपासनम्, एवम् अविच्छिन्नस्मृतिरूपत्वम् उपपादितम् । अतो वेदनस्य उपासनात्मकत्वं तस्य च ध्रुवानुस्मृतिरूपता सिद्धा, सूत्रकृद्वाक्यकारवचनप्रामाण्यात् । क्रमशः

अद्वैतवादप्रभाकरः ।

प्रथमखण्डस्य ३ य संख्यायाः २३६ पृष्ठतोऽनुवृत्तः ।

आथर्व्वणे प्रथममुण्डके "कस्मिन्नु भगवो विज्ञाते सर्व्वमिदं विज्ञातं भवती" ति शौनकप्रश्नानन्तरं "द्वे विद्ये वेदितव्ये" इति विद्याद्वयमवतार्य्य ऋग्वेदादिलक्षणामपरामुक्त्वा "अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमि"त्यादिना परविद्याविषयम् अक्षरं प्रश्नानुसारेण प्रतिपादयता श्रुत्यक्षरेण अभेदस्यैव उपक्रान्तत्वाद्, अन्यथा तयोस्तरानुपपत्तेः । द्वितीयमुण्डके "पुरुष एवेदं विश्वं ब्रह्मैवेदं विश्वमिदं वरिष्ठमि"ति मध्ये परामर्शात्, तृतीयमुण्डकान्ते च "परेऽव्यये सर्व्व एकीभवति स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवति" इत्यैक्यलक्षणफलेन उपसंहाराच्च मुण्डकत्रयात्मिकाया उपनिषद ऐक्यपरत्वे स्थिते, महाप्रकरणबलात् प्रयाजादीनां दर्शपूर्णमासाङ्गत्ववत् मध्यस्थितवाक्यस्यापि "द्वा सुपर्णा" इत्यादेस्तदनुकूलत्वे सम्भवति महाप्रकरणविरोधेन विपरीततात्पर्य्यकल्पनया भेदोपक्रमत्वाभावात् । "परं साम्यमुपैती-" त्यस्य पूर्व्वोक्तन्यायेन वक्ष्यमाणव्याख्यानाच्च ऐक्यपरतया भेदोपसंहारत्वाभावात् । अतएव "अनश्नन्नन्यः" इत्यादिना न तात्त्विकभेदोऽभ्यासाभावात्, ईश्वरगतियौगिकस्य तद्धर्म्मिकस्य वा भेदस्य प्रत्यक्षेण तत् समकक्षमानेन च प्राप्तत्वात्, 'पुण्यपापे विधूय' इत्यादिफलार्थवादयोरैक्यपक्षेऽपि सम्भवेन भेदस्य असाधारणलिङ्गताभावात्, 'अनश्नन्नि' त्यादेः काल्पनिकभेदेन उपपत्त्या तात्त्विकभेदोपपत्तित्वाभावाद् मुण्डके एकत्वे एव तात्पर्य्यं पर्य्यवस्यति ।

"मुण्डकोपनिषत्सु च विद्यास्वरूपतदधिगमोपायफलानां द्वैतमुखेन प्रतिपादनमस्ती"ति मालाकृदुक्तिः प्रागुक्तरीत्या कल्पितद्वैतमादायाङ्गीक्रियते एव । तत् प्रतिपादनप्रका-

रस्तु तदुक्तो नाङ्गीकर्त्तुमर्हः। यत एकविज्ञानेन सर्व्वविज्ञानम् अद्वैतपक्ष एव उपपद्यते नतु द्वैतपक्षे, नहि सर्व्वतो भिन्नानां पदार्थानां एकविज्ञानेन सर्व्वविज्ञानं सम्भवि; अद्वैतपक्षे एकस्य सर्व्वकारणरूपस्य ब्रह्मणो विज्ञाने तत् सत्तया सत्तावतां सर्वेषां तद्विवर्त्तानां ज्ञानं युज्यते, रज्जुतत्त्वज्ञानादिव सर्पधाराभूदलनमाल्यादीनाम्। नहि रज्जुसत्ताव्यतिरेकेण सर्पादीनां अस्ति काचित् सत्ता। न च सर्व्वमूर्त्तसंयोगितया परमात्मनः सर्व्वात्मकत्वम् उपपद्यते, तथात्वे एकविज्ञानेन सर्व्वविज्ञानप्रतिज्ञाया हानात्; नहि सर्वमूर्त्तसंयोगिन आकाशस्य विज्ञानेन तत्संयुक्तानाम् अखिलघटपटादीनां ज्ञानं समुपजायते। नापि सर्व्वसंयोगेन सर्व्वात्मकता प्रमाणसिद्धा, संयोगस्य अव्याप्यवृत्तितया भेदसाधकतयाच सर्वाभेदसाधकत्वानुपपत्तेः, नहि घटपटयोः संयोगः घटस्य पटात्मकतां पटस्य वा घटात्मकतां साधयितुमीष्टे। "द्वा सुपर्णा" त्यत्र पूर्व्वार्द्धेन भेदोऽप्रमेयोऽपदार्थत्वात् अवाक्यार्थत्वाच्च। द्वित्वस्य स्वाश्रयप्रतियोगिकभेदसमानाधिकरणत्वनियमात् श्रुतद्वित्वार्थानुपपत्त्या भेदस्य श्रुतार्थापत्तिगम्यत्वमिति चेत् "द्वौ चन्द्रमसौ" इत्यत्रेव कल्पितभेदेनापि द्वित्वोपपत्तेः तात्त्विकभेदानपेक्षत्वात्, अतएव नोत्तरार्द्धस्यापि तात्त्विकभेदपरत्वं, नह्यस्ति अनुवादे तात्त्विकत्वनियमः, 'यद्रजतं तदानय' इत्यादौ अन्यविधानार्थे भ्रान्तिसिद्धानुवादे तात्त्विकत्वादर्शनात्। वस्तुतः तस्याः श्रुतेः पैङ्गिरहस्यब्राह्मणे बुद्धिजीवपरतया व्याकृतत्वेन जीवेशभेदपरत्वस्य वक्तुमशक्यत्वात्, फलतोऽस्याः श्रुतेरात्मनो भोगाभावे एव तात्पर्य्यावधारणाच्च। एतेन—

"समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः"।

इत्ययं मन्त्रोऽपि व्याख्यातः। "यदा जुष्टं=योगिजनसेवितं अन्यं ईशं=परमात्मानं पश्यति अस्य ईशस्य महिमानं च पश्यति ऐश्वर्य्यवत्तया ईश्वरं पश्यतीती"ति व्याख्यानं महदसङ्गतं प्रकरणविरोधात्। महिमशब्दस्य तद्विशिष्टेश्वरपरत्वे ग्राहकस्य योगिजनादिपदाध्याहारस्य च प्रमाणाभावात्। वस्तुतः जुष्टं=संसारिभिः सेव्यमानं प्रत्यक्षसिद्धं देहेन्द्रियादिप्रपञ्चं अस्य ईशस्य महिमानं=ईश्वरस्य विभूतिरूपं एतदधिष्ठानकत्वेन एतत्सत्तया लब्धसत्ताकत्वादियुक्तं पश्यति मिथ्यात्वादियुक्तं 'पश्यतीति'यावत् ईश्वररूपञ्च ततोऽन्यत् विलक्षणं सत्यत्वाद्युपलक्षितं पश्यति यः स वीतशोकः भवतीत्यर्थः। "परमं साम्यमुपैति" इत्यत्रापि भूयोधर्म्मवत्त्वस्य साम्यार्थत्वेन परमशब्देन भूयोधर्म्मत्त्वस्य उत्कर्षे उच्यते, तथाच सर्व्वधर्म्मवत्तया एकत्वे पर्य्यव-

स्यति, परमसन्न्यास इत्यत्रापि त्यागस्य एव उत्कर्षः, न विदुःकथं रागस्य उत्कर्षः तत् प्रेक्ष्यते धीषणावरेणेति ।

"प्राणो ह्येष यः सर्व्वभूतैर्विभाति" इत्यादिमन्त्रेऽपि प्राणशब्दवाच्यस्य आत्मनः स्वातिरिक्तबाह्यक्रीडारत्यादीनां अभावः, क्रियावान् इत्यनेन ध्याना-दिसाधनं, समस्तपक्षेतु बाह्यक्रियाभावः प्रतिपाद्यते । अद्वैतज्ञानसाधनतया ज्ञानोत्पत्तौ आत्मसाक्षात्कारात् पूर्व्वं ध्यानादीनां अपेक्षा अद्वैतवादिनां सम्मता एव, तथाच ब्रह्मसूत्रं—"सर्व्वापेक्षाच यज्ञादिश्रुतेरश्ववत्" इति । उत्पन्ने च ज्ञाने नास्त्येव क्रियादिः "अग्नीन्धनाद्यनपेक्षा चेति" ब्रह्मसूत्रात् । अतः ज्ञान-साधनतया ध्यानादेरपेक्षणात् अयुक्तमेतत् "नह्यद्वैतविज्ञाने तादृशे भवति तत्क-शायां क्रियावत्त्वस्यासम्भवादिति" दूषणं, समस्तपक्षे तु नास्त्येव काचिदाशङ्का । "सर्व्वभूतैर्विभाति" इत्यस्य सर्वमूर्त्तसंयोगित्वरूपार्थकथनं तु प्रागेव खण्डि-तम् । एवं नैयायिकसम्मतद्वैतपरत्वव्याख्यानन्तु कुशकाशावलम्बनमेव । "प्रण-वोऽधनुः······तन्मयो भवेदिति" । प्रणवध्यानेन विद्यया आत्मनः उपाधिना-शात् ब्रह्मणा तन्मयीभाव उपपद्यते । न्यायमते तु नित्यानां जीवात्मनां सदा-नित्यविशेषवत्त्वात् कथमपि पृथगस्तित्वस्य अविभावनं नोपपद्यते, अद्वैतपक्षे शरस्य लक्ष्यैकात्मफलत्वात् उपमानसङ्गतिः । "गताःकलाः पञ्चदशप्रतिष्ठा देवाश्च सर्व्वे प्रतिदेवतासु । कर्म्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व्व एकी-भवन्ती"तिश्रुतौ परेऽव्यये सर्वे एकीभवन्तीत्यस्य अभेदप्रतिपादकत्वं स्फुटमेव । न च वाच्यं यद्येकात्मत्वं पारमार्थिकं कथमभूततद्भाववचनं उपपद्यते इति स्वगृहनिक्षिप्ताज्ञातनिधिवत् सतोऽपि एकत्वस्य आवृतत्वेन अभूतसमतया च्वि-प्रत्ययोपपत्तेः । न च पारमार्थिकाद्वैतस्यासिद्धत्वं वक्तुं शक्यते, सर्वश्रुतीनां तत्रैव तात्पर्य्यावधारणस्य उक्तत्वात् वक्ष्यमाणत्वाच्च । द्वैतपक्षे एव च्विप्रत्ययार्थस्य विरो-धः । नहि अन्यद्वस्तु अन्यत्कर्त्तुं कथमपि शक्यते, नहि क्षीरे नीरं एकत्वं आपद्यते, तयोः मिश्रणेऽपि सत्तया पृथगेव अवस्थानात्, अन्यथा हंसादीनां नीरात् क्षीरस्य पृथ-ग्ग्रहणासम्भवापत्तेः । तादृशैकीभावस्वीकारे लवणापाताच्च । अधिष्ठानात्मको-पादानकारणे कार्य्यलयस्य प्रसिद्ध्या रज्ज्वादौ सर्पादेर्लयस्य अनुभवसिद्धत्वाच्च । न्यायमते आत्मन उपादानत्वस्य असम्मतत्वात् । समाधौ अपि न तादृशलयः सम्भवी । "ब्रह्मवेद ब्रह्मैव भवती" ति एकत्वस्य स्फुटः परामर्शः । न च नह्यद्वैतवादिमते पूर्वमसिद्धो ब्रह्मभावो ज्ञानेन साध्यते येन भवतीति स्यात्, नाप्येवकारः कथावर्त्य-विरहेण वैयर्थ्यादि"ति वाच्यं पूर्व्वोक्तरीत्या साक्षात्कारप्राक्कालीनौपाधिकभेदमा-

वाय भवत्यर्थस्य एवकारव्यावृत्तेश्च सुघटत्वस्य उक्तत्वात् । "ब्रह्मैव भवती"ति एवकारेण साम्यस्य बोधने सामर्थ्याभावेन "एवकारेण साम्यस्य बोधनाद् राजैव भवति अयं श्रेष्ठीतिवत् तथाविधसाम्यप्राप्तेः साध्यत्वञ्च भवति प्रयोगे बाधाभावादित्ययुक्तम् । "राजैव भवति अयं श्रेष्ठी" इत्यत्रापि न राजसाम्यम् एवकारेण अभिधीयते, अपितु राजगुणयोगात् तस्मिन् राजत्वम् आरोप्यते । न्यायमते मुक्तौ मनःसंयोगाद्यभावेन आत्मनश्चैतन्याभावात् जड़तया न कथमपि नित्यज्ञानादिमता ईश्वरेण परमात्मना साम्यं तद्गुणयोगो वा घटते । यद्वैतिपक्षान्तराश्रयणन्तु वृश्चिकभिया पलायमानस्य आशीविषमुखप्रवेश एव । पञ्चभूतगुणानां रूपादीनां कस्यचिदप्यंशत्वानुपपत्तेः, "प्रतिष्ठा गताः" इत्यस्य विनष्टाः इत्यर्थकल्पनाया अदृष्टचरत्वात्, देवकर्म्मदेवतादिशब्दानां तादृशार्थे वृत्तेरयोगात्, रूढिशक्यसम्बन्धाद्यभावेन लक्षणानुपपत्तेः तादृशनयस्य च प्रमाणाद्यसिद्धतया तथार्थकल्पनासम्भवात् । पञ्चदशशरीरोपादाननिमित्तानि पञ्चभूतानि रूपरसगन्धस्पर्शशब्दाः शरीरचारिणः प्राणाद्याः पञ्चवायवः इतिपञ्चदशांशाः प्रतिष्ठागता विनष्टाः, देवा ज्ञानेन्द्रियाणि, कर्म्माणि कर्मसाधनानि हस्ताद्यवयवाः देवतासु महाभूतरूपासु भूतात्मकतत्तदिन्द्रियाद्यधिष्ठात्रीषु वा एकीभवन्ति महाभूतेषु समष्टीन्द्रियादिदेवशरीरेषु वा विलीयन्ते तद्व्यावृत्तधर्म्मम् इन्द्रियत्वादिकं परित्यजन्ति इति यावदिति व्याख्यानासङ्गतेः । "विज्ञानमयः आत्मा जीवात्मा परमात्मनि एकीभवति परमात्मव्यावृत्तसुखदुःखादृष्टादिधर्मं परित्यजति" इत्यत्रापि 'एकीभवति' इत्यस्य स्वार्थत्यागात् । न्यायमते मुक्तौ सुखदुःखादिपरित्यागेऽपि परमात्मनि नित्यज्ञानेच्छाकृत्यादीनां बहूनां विरुद्धधर्म्माणां सत्त्वात् नित्यविशेषस्य स्वस्मिन्नपि विद्यमानत्वाच्च एकीभावानुपपत्तेश्च । अतः प्रदर्शितदिशा न्यायमते एव अपेद्वयस्यासङ्गतिः । अद्वैतपक्षे दोषाभावश्च प्रदर्शितः ।

माण्डूक्ये द्वैतपक्षाभ्युपगमप्रदर्शनन्तु अतिसाहसम्, तत्र स्फुटाद्वैततत्त्वोपदेशोपलब्धेः । तत्र तावत् प्रथमं सर्वात्मकब्रह्मवाचकतया वाच्यवाचकयोरभेदविवक्षया आत्मप्रतिपत्त्युपायभूतस्य ओंकारस्य सर्वात्मकत्वमुक्तम् "ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वं ओङ्कार एव यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव इति । अतः अभिधेयस्य ब्रह्मणः जाग्रत्स्वप्नसुषुप्त्याद्यवस्थावर्णनेन प्रपञ्चमिथ्यात्वप्रदर्शनपूर्वकं विराट्—तैजस—प्राज्ञेश्वरादिस्वरूपेण ऐक्यमुक्त्वा अविद्याकल्पितसर्वोपाधिशून्यं तुरीयस्वरूपं प्रपञ्चितम् "सर्वं ह्येतद्ब्र-

ह्यायमात्मा ब्रह्म सोऽयमात्मा चतुष्पाद्" "जागरितस्थानः बहिःप्रज्ञः······स्थूलभुग् वैश्वानरः प्रथमपादः।" स्वप्नस्थानः अन्तःप्रज्ञः······प्रविविक्तभुक्तैजसः द्वितीयपादः" "यत्रसुप्त न कञ्चन······आनन्दभुक् चेतोमुखः प्राज्ञस्तृतीयपादः एष सर्वेश्वरः एष सर्वज्ञः एषोऽन्तर्यामी योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां" "नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञं। अदृश्यमव्यवहार्य्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यते स आत्मा स विज्ञेयः" इत्यादिना। कुतोऽत्र द्वैतपक्षस्यावकाश इति मनीषिभिर्विभावनीयम्।

यथार्थज्ञानेन भ्रमस्य शुद्धि र्जायते इति सर्वसम्मतम्, नच मिथ्याज्ञानेन ज्ञानशुद्धिः कस्यापि सम्मता, तत्कथं असर्वात्मकस्य प्रणवस्य ध्यानशुध्यर्थं सर्वात्मकत्वकथनमिति ते एव विद्वांकुर्वन्तु। सर्वं "खल्विदं ब्रह्मेतिवत्" अयं दृष्टान्तोऽपि तेषां साध्यविकलः, नहि तत्रापि ध्यानशुद्ध्यर्थं असर्वात्मकस्य सर्वात्मकत्ववचनं सिद्धमस्ति, साक्षादेव ब्रह्मणः सर्वात्मकत्वमिद्धान्तात्, अद्वैतमते हि सर्वात्मकत्वं ब्रह्मणः पूर्वमेवोपपादितम्। स्वप्नसुषुप्तिवर्णनेन व्यावर्त्यमानतया द्वैतस्य मिथ्यात्वं अनुवर्त्तमानतया च अद्वैतात्मत्वस्य सत्यत्वं वर्णितं, नात्र जीवात्मनि परमात्मनः आरोपः कथमपि उपलभ्यते। न चात्र योगभूमिप्रदर्शनस्य प्रसङ्गोऽपि विद्यते तस्याप्रकरणत्वात्। तुरीयपादे आत्मनः स्वरूपनिर्द्देशः। "नान्तः प्रज्ञः" इत्यादावपि नैयायिकसिद्धान्तः न प्रत्यभिज्ञायते नाप्रज्ञमिति स्फुटतया प्रज्ञाभावस्य निषेधात्, नहि तन्मते आत्मनि प्रज्ञाभावस्य निषेधः अर्थवात् प्रज्ञागुणकत्वात् तस्य। न च मोक्षावस्थायां प्रज्ञाभावस्य निषेधःअर्थेतान् तदानीम् आत्ममनःसंयोगाभावेन आत्मनः प्रज्ञाभावस्य सिद्धत्वेन स्वभावजड़त्वेन च खर्परपाषाणादिवृत्तेरविशेषात्। तन्मते आत्मनः ज्ञानं न स्वाभाविकं अपितु मनःसंयोगजन्यम्।

अद्वैतवादिमते आत्मनः साक्षात् शब्दावाच्यतया अभावमुखेनैव तत्प्रतिपादनं प्रायेण "नेति नेति" "अस्थूलमनणु" मित्यादौ सर्व्वत्र लक्ष्यते, सत्यं ज्ञानमित्यादौ अपि सत्यादिरसत्यत्वादिव्यावृत्तिरेवाङ्गीकृता, अतोऽयुक्तमभिहितं "यद्यद्वैतवाद्यभ्युपगतमुक्तिस्वरूपमपरोक्षानुभवात्मकब्रह्मात्र विवक्षितं स्यात् भावमुखेन प्रज्ञात्मकत्वेनैव उच्यते"ति। नापि "शान्तं शिवमद्वैतं" "प्रपञ्चोपशमं" "एकात्मप्रत्ययसारं" इत्यादि श्रुत्यर्थः तन्मते आञ्जस्येन उपपद्यते। ऋजुमार्गे

विहाय "ज्ञानसामान्याभावाद् द्वैतधीविरहेण तत्राद्वैतमिति व्यपदेष्टुं शक्यते" इत्यादितद्व्याख्यानं कण्ठवेष्टनपूर्वकं मुखे ग्रासप्रदानरीतिमनुसरति। नापि तथा व्याख्याने ऽस्ति श्रौतं किमपि लिङ्गम्। "अद्वैतमते अलीकप्रतियोगित्वात् "प्रसिद्धवन्ध्यापुत्रमरणवत् प्रपञ्चोपशमस्यैवार्थसिद्धि" रित्याद्युक्तिः लौकिकसकलप्रमाणसिद्धभेदमादाय अपकृत प्रत्युक्ता। आकाशानित्यत्वमादाय प्रपञ्चबाधासम्भवप्रदर्शनं "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इत्यादिश्रुत्यैव निरस्तं। प्रपञ्चोपशमे सर्वमुक्तिप्रसङ्गस्तु जीवभेदेन च विद्याभेदादेकस्य विद्यया अविद्यायां निवृत्तायां अपि सर्वेषां तन्निवृत्तेरयोगात् एकस्यां रज्जौ बहूनां सर्पादिभ्रमे एकस्य रज्जुतत्त्वदर्शने अन्येषां सर्पादिभ्रमानिवृत्तेर्दर्शनात् परिहृतः। जीवभेदस्य औपाधिकत्वेऽपि उपाधीनां आनन्त्यात् अनादित्वाच्च नात्माश्रयः। अतः "प्रपञ्चभेदात् प्रपञ्चभेदः" इतीदं दूषणं अस्थाने एव। प्रपञ्चोपशमे तदन्तर्गतोपाधीनामपि विलयः भवत्येव। तात्पर्य्यवत्या अद्वैतश्रुत्या व्यावहारिकभेदमादाय प्रवृत्तस्य दुर्ब्बलप्रत्यक्षस्य बाधोचित्यात् न प्रत्यक्षेण द्वैतसिद्धिः। अन्यथा "स्थूलोऽहं" इत्यादिप्रत्यक्षात् देहात्मवादस्यैव विजयात् न्यायमते देहातिरिक्तात्मासिद्धिरित्यलं विष्टपेषणेन।

तैत्तिरीयोपनिषदः अपि सर्वात्मके ब्रह्मणि एव तात्पर्य्यम्। तथाहि ब्रह्मविदाप्नोति परं इत्युपक्रमे आत्मस्वरूपब्रह्मज्ञानेन तत्प्राप्त्यभिधानात् ब्रह्मणः स्वरूपमुक्तम्। नहि अन्यज्ञानेन अन्यत् प्राप्यते। अन्यत्रापि श्रुतौ, ब्रह्मज्ञानेन ब्रह्मभाव उच्यते "स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवति" इत्यादि। ततः "सत्यं ज्ञानमनन्तं ब्रह्मे"ति ब्रह्मणः अन्यव्यावृत्तस्वरूपलक्षणमुक्तम् नहि द्वैतवादिनो नैयायिकस्य मते ब्रह्मणो ज्ञानस्वरूपता। ततः कार्य्यद्वारेण ब्रह्मणः तटस्थलक्षणं वक्तुं आकाशादिसृष्टिरुक्ता, नह्येतदपि नैयायिकसिद्धान्तसम्मतम्। अथ अन्नमयादिकोशोपन्यासेन अरुन्धतीदर्शनन्यायेन सर्वान्तरात्मतत्त्वमुपदिष्टं, द्वैतमतं परिष्कुर्वतां नैयायिकानां अनुपयोगात् एतत्कोशपञ्चकमपि न सम्मतम्, तदुक्तमुदयनाचार्य्यपादैः अद्वैतमतमुपक्रम्य "किमार्द्रकवणिजां वहित्रचिन्तये"ति। तेषां अन्नमयकोशरूपदेहमात्राद् आत्मनः अन्यत्वव्यवस्थापने तात्पर्य्यात् प्राणमनोविज्ञानानन्दमयकोशेभ्यः व्यतिरेकदर्शने तात्पर्य्याभावात्। ततः "तदात्मानं स्वयमकुरुत" इति आत्मनः एव जगद्रूपेण विवर्त्तः उक्तः, नह्येतदपि तेषां अभिमतम्। तत्परं आत्मनः आनन्दरूपता उक्ता "यदेष आकाश-

आनन्दो न स्यात्" इत्यादिना, एतदपि तेषां विरुद्धम्। ततो भेदनिन्दया आत्मैकत्वं दृढीकृतम् "यदा ह्येवैष एतस्मिन्नुदरं अन्तरं कुरुते अथ तस्य भयं भवति" इति उदरं अल्पमपीत्यर्थः। "उत् अर" शब्दाभ्यां सर्वविधः भेदः निरस्तः, एतदपि, तेषां मूलोच्छेदकरम्। भृगुवल्ल्यामपि ब्रह्मविद्यासाधनस्य तपसः अन्नमयाद्युपासनस्य च विधानाय ज्ञेयस्य ब्रह्मणः स्वरूपलक्षणं परिष्कृतम् अतः अत्रापि अद्वैतब्रह्मण्येव तात्पर्य्य मवसीयते। "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योऽन्नम् अन्नात् पुरुषः।" इति आत्मनः आकाशस्य उत्पत्तिश्रुतेः उक्तन्यायमतविरोधपरिहाराय "आकाशसृष्टेराकाशाभिव्यञ्जनमात्रकत्वात्। अभिव्यञ्जनस्य शब्दसृष्टिद्वारकं अन्तरेण शब्दं आकाशज्ञानस्यासम्भवात्।" इति व्याख्यानं अतिहास्यकरम्। आकाशसृष्टे राकाशाभिव्यक्त्यर्थकत्वे "एतस्मादात्मनः आकाशः सम्भूतः" इत्यस्याः श्रुतेः आत्मनः अभिव्यक्तः इत्यर्थः सम्पद्यते। तथा च आदौ "जनिकर्त्तुः प्रकृति-" रिति प्रकृतौ पञ्चमी बाधिता स्यात्, अत्र पञ्चम्या अन्यार्थकल्पने "आकाशाद्वायुः" इत्यादि-प्रकृतिपञ्चमीप्रवाहे अकस्मात् "आत्मनः" इत्यत्र अयुक्ता अन्यादृशकल्पना प्रसज्येत। "यत् प्रवाहे पतितं यच्च तत्तादृगवगम्यते" इति नियमात्। अत्र शब्दसृष्टेर-दर्शनात् अभिव्यञ्जनस्य शब्दसृष्टिद्वारकमित्युक्तिरसंगता, तथा च शब्दादाकाशः सम्भूतः इत्येवं श्रुतिः स्यात्, नचासौ उपलभ्यते, उपलभ्यते च तद्विरुद्धा "आत्मनः आकाशःसम्भूतः" इति श्रुतिः। आत्मनः इत्यत्र हेतौ पञ्चम्यङ्गीकारेऽस्य कीदृशी हेतुतेति वक्तव्या, नहि नित्यस्याकाशस्य उत्पत्तौ आत्मा हेतुर्भवति दण्डइव घटस्य नापि आकाशाभिव्यक्तौ हेतुः आत्मा, प्रमाणाभावात्, तैरनङ्गीकाराच्च। एतच्च महत् चित्रं, यदेकस्य "सम्भूत" शब्दस्य आकाशेन अन्वये अभिव्यक्त्यर्थकत्वं वाय्वादौ अन्वये उत्पत्त्यर्थकतेति। नहि एकस्मिन्नेव वाक्ये एकस्य शब्दस्य एक-त्रान्वये लक्षणा अन्यत्र अभिधावृत्ति राश्रयितुं युज्यते, मुख्यार्थबाधे एव लक्षणाङ्गीकारात्, "शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभावः" इति न्यायेन लक्षणायाः परं पुनः शक्त्यादिकल्पनाऽयोगाच्च। नापि वाय्वादौ अपि अभिव्यक्त्यर्थकत्वं स्वीकार्य्यं तन्मते तेषां उत्पत्तेरेवाङ्गीकारात्, आकाशादीनां वाय्वादेरभिव्यञ्जकत्वाभावाच्च। वाय्वादौ सम्भूतशब्दस्य उत्पत्त्यर्थस्वीकारेण आत्मनः इत्यत्रापि तथास्वीकर्त्तुं युक्ततया प्रकृतिपञ्चम्या एव न्याय्यत्वात्। अपि च आकाशोत्पत्तिश्रुतेर्बाधकाभावात् लक्षणा अपि निर्बीजा। अतो दूषणपाहयासयस्तत्वात् मद्द्व्याख्यान-कौशलं प्रकटितम् श्रीमता नानादर्शनाचार्य्यवर्य्येण। "आकाशवत् सर्व्वगतश्च

नित्यः" इत्यत्र सर्वगतत्वेन उपमानाच्चाकाशस्य नित्यत्वसिद्धिः। नित्यत्वेनोपमास्वीकारेऽपि सृष्टेरादितः प्रलयकालपर्य्यन्तवर्त्तमानतया आपेक्षिकनित्यत्वमादायोपमायाः सङ्गतेः, नहि तादृशं आपेक्षिकं नित्यत्वादिकं विहाय उपमया अलौकिकपदार्थबोधनं सम्भवति, तादृशलौकिकपदार्थान्तरस्यासम्भवात्। सर्वत्रैव अलौकिकार्थबोधनाय तादृशी एव उपमा उपादीयते, नहि भूमण्डलं मालुरफलमिव वर्त्तुल मित्युक्ते मालुरफलस्यापि भूमण्डलसमत्वं तादृशवर्त्तुलत्वं वा आपद्यते। यदुक्तं "योऽयं आकाशस्य सम्भव उक्तः तद्योपव्याख्यानं अग्रे श्रूयते "असद्वा इदमग्र आसीत् ततो वै सदजायत तदात्मानं स्वयमकुरुत" इत्यादि तदेतत् श्रुत्यन्तरानालोचननिबन्धनम्। श्रुतौ अन्नमयकोशनिरूपणप्रस्तावे आकाशादीनामुत्पत्ति रुक्ता, नात्र तस्य प्रसङ्गोऽस्ति। अपितु इतः अव्यवहितपूर्व्वश्रुतौ "सच्च त्यच्चाभवत्" इत्यारभ्य "सत्यमभवत् यदिदं किञ्च तत्सत्यं इत्याचक्षते," इति सत्यं ज्ञानमनन्तं ब्रह्म" इति प्रकृतस्य ब्रह्मणः सर्व्वात्मकता सर्वान्तरतमत्वं च उक्तं, तदर्थं श्लोकं आह,—अप्येष श्लोको भवति "असद्वा इदमग्र आसी" दित्यादि, एतेन व्याकृतनामरूपविशिष्टस्य जगतः लौकिकव्यवहर्त्तृणां सच्छब्दवाच्यत्वेन कारणात्मकावस्थायां तादृशव्यवहारिकसत्ताभावेन तदयोगात् कारणरूपब्रह्माभिन्नस्य जगतः असच्छब्देन निर्देशः, नतु स्वतः ब्रह्मणः असद्रूपता, अधस्तात् "असन्नेव स भवति असद्ब्रह्मेति वेद चेत्" इति ब्रह्मणः असद्रूपताज्ञानस्य निन्दितत्वात्; कारणे असद्व्यवहारस्तु कार्य्यानभिव्यक्तिनिबन्धनं, लौकिकानां, पारमार्थिकं सत्यत्वं तु ब्रह्मणः स्वरूपं, अतो लौकिकसद्व्यवहारास्पदस्य जगतः आदौ अनभिव्यक्तकार्य्यरूपेण अतएव लौकिकैः असत्तया प्रतिपन्नेन ब्रह्मणा अभेदस्य साक्षात् श्रुत्यर्थतोपपत्तेर्नाभ्युपगमविरोधः नचासङ्गति र्नापि निरर्थकता। अतस्तेषां "अनभिव्यक्तकार्य्यकत्वेन असत्कल्पं यद्ब्रह्म तत्तुल्यं आसीदिति" आयुर्घृतमितिवत् हेतुहेतुमतोरभेदोपचारात् तदेवासीदिति वा इत्यादि नित्यस्य कार्य्याभिव्यक्त्या अभिव्यक्तिरपि जन्मार्थकधातोरर्थः इत्यादि च व्याख्यानं अतिक्लिष्टकल्पनायोगात् शब्दन्यायविरोधात् सकलोपनिषदर्थस्य बाधनाद् अनादरणीयमेव। शेषं तु पूर्व्वोक्तव्याख्यानेनैव खण्डितमिति न मृतस्य खड्गप्रहाराय प्रयत्यते॥

ऐतरेयोपनिषदि "आत्मा वा इदमेक एवाग्र आसीत्। नान्यत् किंचन मिषत्" इत्यादि श्रुत्या "वै" "एकः" "एवे"ति शब्दैः त्रिविधावधारणेन परमात्मनः सजातीयविजातीयस्वगतत्रिविधभेदनिरासपूर्वकम् एकत्वेन

उपक्रम्य तत्प्रतिपादनार्थं सप्रपञ्चं निखिलसृष्टिक्रमम् उक्त्वा "स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमितीऽ३" इति श्रुत्या सर्वात्मकब्रह्मतत्त्वमपरोक्षदर्शन-मभिधाय वैराग्यार्थं संसारगतिं प्रतिपाद्य वामदेवादीनां ज्ञानेन मोक्षमुक्तिं दर्शयित्वा "एष ब्रह्मा एष इन्द्र एष प्रजापतिः एते सर्वे देवा इमानि च पञ्चमहाभूतानि .... प्रज्ञानं ब्रह्मे"ति सर्वात्मभावं ज्ञानात्मकत्वं च प्रदर्श्य मोक्षः प्रतिपादितः । इत्यतोऽत्रापि अद्वैते तात्पर्यं स्फुटमवधार्यते ।

"नान्यत् किञ्चन मिषदित्यत्र मिषदित्यस्य व्यापारवदित्यर्थः । 'मिष स्पर्द्धायाम्' भौवादिकधातुपाठात् स्पर्द्धायाश्च व्यापारविशेषार्थकत्वात् । सेचनार्थस्य तौदादिकस्य मिषधातोः रूपकल्पनं तु शब्दानुशासनानभिज्ञता विलसितमिव प्रतिभाति, तथात्वे उपधाया गुणप्रसङ्गात् अर्थासाङ्गत्याच्च । व्यापारवदित्यर्थकत्वेन पराभिमतानां व्यापारवतां प्रधानपरमाण्वादीनां सत्त्वनिषेधात् न्यायाभिमतपरमाणुकारणताऽसिद्धिः । तन्मते व्यापारविशिष्टेभ्य एव परमाणुभ्यो द्व्यणुकादिक्रमेण सृष्टेरभ्युपगमात् । "अतः मिषदित्यस्य द्वैतमित्यर्थः" इत्युक्तिर्नितरामसङ्गता । द्वैतोपपत्तिहेतुतया यदुक्तम् मालाकारेण "सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिविधीयतेऽथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते ।" इति जीवभेदस्य उक्तेः वामदेवमोक्षाभिधानाच्चेति ।" तद् बालविमोहनमेव । अत्र हि पितृपुत्रादिदेहाद्यवच्छिन्नगौणमिथ्यात्वभेदः अनूदितः । अस्य म्रियमाणस्य पितुः सोऽयं पुत्रात्मा पितुः कार्यकारित्वात् पितृदेहाद्यवच्छिन्नात्मना कथंचिद् साधर्म्यात् तु गौण्या पुत्ररूप आत्मा (यथा शौर्यादिसाधर्म्यात् सिंहरूपः माणवकः) पुण्येभ्यः शास्त्रोक्तेभ्यः कर्मभ्यः कर्मनिष्पादनार्थं प्रतिविधीयते—पितुः स्थाने पित्रा यत् कर्तव्यं तत् करणाय प्रतिनिधीयते अर्थात् आत्मतुल्यतया स्थाप्यते । अथ अनन्तरं पुत्र आत्मनः कर्मभारस्थापनानन्तरम् अस्य पुत्रस्य इतरः अयं यः पित्रात्मा कृतकृत्यः कर्तव्यात् विमुक्तः वयोगतः जीर्णः सन् प्रैति म्रियते, स इतः प्रयन्नेव स्थूलशरीरं परित्यजन्नेव देहान्तरम् उपाददानः पुनर्जायते इति श्रुत्यर्थः । पिता मरणसमये स्वकर्तव्यस्य असमाप्तस्य कर्मणः पूर्त्यै पुत्रः प्रतिनिधीक्रियते इत्ययम् प्रसिद्धः अर्थः श्रुत्या अनूदितः, नानेन वास्तवः भेदोऽभेदो वा प्रमाणपदवीमधिरोहति ; तथात्वे "सोऽस्यायमात्मा" इत्युक्त्या पितुः पुत्रात्मना अभेदोऽपि सिध्येत्, "प्रैति" "जायते" इत्यादिशब्दात् आत्मनः जन्ममरणादयोऽपि सिध्येयुः । तथा च न्यायशास्त्रेषु महान् विप्लवः—तत्पदार्थाश्च दत्तजलाञ्जलयः स्युः । मिथ्या-

ज्ञानोपाधिकभेद मादाय बन्धमुक्तभेदव्यवस्थाया असकृदुक्तत्वात् पितृपुत्रभेदस्य वामदेवादिमोक्षस्य च नानुपपत्तिः । महर्षिं गौतमोऽपि मिथ्याज्ञाननिवृत्तिद्वारैव तत्त्वज्ञानस्य मोक्षसाधनत्व मामनति,—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥" इत्यादिसूत्रजातेन । अतः देहे आत्मबुद्धौ आत्मभेदबुद्धौ च मिथ्याज्ञानमेव निमित्तम् । एकान्ततो द्वैताभिनिवेशवता नानावर्णनाचार्य्यवर्य्येण स्वयमेव पूर्वोक्तायाः श्रुतेरद्वैतपरत्वमाशंक्य तन्निराकरणाय "कोऽयमात्मेति वयमुपास्महे कतरः स आत्मे"ति ब्रह्मविद्यासाधनकृत-सर्वात्मभावफलावाप्तिं वामदेवाद्याचार्य्यपरम्परया कथ्यमानां ब्रह्मवित् परिषदि अत्यन्तप्रसिद्धाम् उपलभमानानां मुमुक्षूणां ब्राह्मणानां ब्रह्मजिज्ञासूनाम् अनित्यात् साध्यसाधनलक्षणात् संसारात् आ जीवभावाद् व्याविवृत्सूनां विचारयताम् अन्योन्यपृच्छारूपां श्रुतिमुदाहृत्य अन्यथा व्याख्यातं, तत्रापि अवदधतु सन्तः । आदौ तावत् पश्यन्तु पूर्णां श्रुतिमिमां, नहि कस्यचित् एकांशदर्शनेन अन्धहस्तिन्यायेन सकलार्थावधारणं सम्भवति । अस्ति ऐतरेयोपनिषदि तृतीयाध्याये आदितः,—"कोऽयमात्मेति वयमुपास्महे, कतरः स आत्मा, येन वा पश्यति, येन वा शृणोति येन वा गन्धान् आजिघ्रति, येन वा वाचं व्याकरोति, येन वा स्वादु चास्वादु च विजानाति ॥१॥ यदेतद् हृदयं मनश्चैतत् । संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टि धृति मति मनीषा जूतिः स्मृतिः संकल्पः क्रतु रसुः कामो वश इति । सर्वं एयवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥ २ ॥ एष ब्रह्मैष इन्द्र एष प्रजापति रेते सर्वे देवा इमानि च पञ्चमहाभूतानि पृथिवी वायु राकाश आपो ज्योतींषी त्येतानीमानिच क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत् किंचेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरम् । सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥ ३ ॥ स एतेन प्रज्ञेन आत्मना अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामान् आप्त्वा अमृतः समभवत् समभवदिति ॥ ४ ॥ श्रुतेरस्या उपक्रमाद्यानुगुण्येन उपपन्नतरा व्याख्या उदाह्रियते,—विदां कुर्वन्तु तावत् विद्वद्वर्य्याः,—यमात्मानम् अयमात्मा इति साक्षात् वयमुपास्महे कः स आत्मेति, यंच आत्मानम् अयमात्मेति साक्षादुपासीनो वामदेवः अमृतः समभवत्, तमेव वयम् अपि उपास्महे को नु खलु स आत्मेति सामान्यतो जिज्ञासापूर्वं पृच्छतां ब्राह्मणानाम् अतिक्रान्तविशेषविषयश्रुतिसंस्कारजनिता स्मृतिरजायत,—"प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं"

"स एतमेव सीमानं विदार्य्यैतया द्वारा प्रापद्यत" इत्यादिश्रुत्या ज्ञायते एतमेव पुरुषं द्वे ब्रह्मणी इतरेतर प्रातिकूल्येन प्रतिपद्ये—इति, ते च ब्रह्मणी शरीरस्य आत्मभूते, तयोरन्यतर आत्मा उपास्यो भवितुमर्हति । योऽत्रोपास्यः कतरः स आत्मा इति विशेषनिर्धारणार्थं पुनरन्योऽन्यं पप्रच्छुर्विचारयन्तः । पुनस्तेषां विचारयतां विशेषविचारणास्पदविषया मतिरभूत् । द्वे वस्तुनी अस्मिन् पिण्डे उपलभ्येते,—अनेकभेदभिन्नेन येन करणेन उपलभते तदेकं, यश्च एक उपलभते, करणान्तरोपलब्धिविषयस्मृतिप्रतिसन्धानात् । तत्र न तावत् येन करणेन उपलभते स आत्मा भवितुमर्हति । केन उपलभते इति स्वयमेव उच्यते,—येन वा पश्यति इत्यादि । अतोऽनेकभेदभिन्नम् उपलब्धिसाधनं चक्षुरादिकं न आत्मा इत्यर्थः । अतःपरं "यदेतत् हृदयम्" इत्यादिश्रुत्या प्राणस्यैव सर्वकरणात्मकत्वमुक्तम् । तस्मात् यत् पद्भ्यां प्रापद्यत तदुपलब्धु रुपलब्धिकरणत्वेन गुणभूतत्वात् नैव उपास्य आत्मा भवितुमर्हति । पारिशेष्यात् यस्य उपलब्धुरुपलब्ध्यर्था एतस्य हृदयमनोरूपस्य करणस्य वृत्तयो वक्ष्यमाणाः, स उपलब्धा उपास्य आत्मा नोऽस्माकं भवितुमर्हति इति निश्चयं कृतवन्तः । अतःपरं अस्य उपलब्धुरात्मनः वृत्तय उच्यन्ते,—संज्ञानं—संज्ञप्तिः चेतनभावः, इत्यादयः । संज्ञानादयः अन्तःकरणवृत्तय उपलब्धुरुपलब्ध्यर्थत्वात् शुद्धप्रज्ञानरूपस्य ब्रह्मणः उपाधिभूताः तदुपाधिजनितगुणनामधेयानि संज्ञानादीनि सर्वाण्येवैतानि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवन्ति । प्रज्ञानरूपस्य आत्मनः चेतनाचेतनसर्वात्मकतां, दर्शयति 'एष ब्रह्मैष' इन्द्र" इत्यादिना । पूर्वोक्तम् सर्वं स्थावरजङ्गमादिकं सर्वं प्रज्ञानेत्रं—प्रज्ञप्तिः—प्रज्ञा तच्च ब्रह्मैव, नीयतेऽनेन नेत्रं प्रज्ञानेत्रं यस्य तदिदं प्रज्ञानेत्रं, प्रज्ञाने ब्रह्मणि उत्पत्तिस्थितिलयकालेषु प्रतिष्ठितम्, प्रज्ञाश्रयमित्यर्थः । प्रज्ञा प्रतिष्ठा सर्वस्य जगतः । तस्मात् प्रज्ञानं ब्रह्म । तदेतत् अस्तमितसर्वोपाधिविशेषं सत् निरञ्जनं निर्म्मलं निष्क्रियं शान्तम् एकम् अद्वयं नेति नेति सर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरं, तदत्यन्तविशुद्धप्रज्ञोपाधिसंबन्धेन सर्वज्ञमीश्वरं सर्वसाधारणाव्याकृतजगद्बीजप्रवर्त्तकंनियन्तृत्वादन्तर्यामिसंज्ञं भवति । स वामदेव एतेन प्रसिद्धेन प्रज्ञेन आत्मना अस्माल्लोकात् अविद्याकृतात् संसारात् उत्क्रम्य ज्ञानावद्योतितामलसर्वात्मभावमापन्नः सन् अमुष्मिन् अजरेऽमरेऽमृतमयेऽभये प्रज्ञानामृतैकरसे स्वर्गे लोके स्वस्मिन्नात्मनि स्वस्वरूपे अमृतः समभवत् आत्मज्ञानेन पूर्णकामतया

जीवन्नेव सर्वान् कामान् आप्त्वा इत्यर्थः । इदानीमवलोकयन्तु दर्शनाचार्य्यीयां व्याख्याम्,—"अत्र द्वौ प्रश्नौ श्रूयेते, तयोरेकः स्वात्मव्यक्तिविषयः कोऽयमितीदमा निर्देशात्, अन्यश्च जातिविषयः कतर इति निर्देशात्, न ह्यद्वैतपक्षे प्रश्नद्वयं घटते, एकस्यैव वास्तवत्वात् जातिविरहाच्च । तयोराद्यप्रश्नस्योत्तरं येन पश्यतीत्यादिना । संज्ञानमाज्ञानमित्युपक्रम्य चान्त्यप्रश्नस्योत्तरम्, चेतनसामान्य मिति तस्य फलितार्थः । ज्ञानाश्रयत्वं प्रज्ञानपदबोध्यात्मत्व-सामान्यं वा तदनुगमकम् । पञ्चमहाभूतानीति तदभिमानिदेवतापरम् । 'एष ब्रह्मैव' इत्यादौ यत् किञ्चेदं प्राणि जङ्गमञ्च पतत्रि च यच्च स्थावरम् इत्यन्तो जीवनिर्देशात् । जीवानामप्यस्ति जीवसम्बन्धः एतत् सर्वं चेतनमिति सामान्यज्ञानायेदम् । यद्यद्वैतपरं स्यात्" यत् किञ्चेदं प्राणि जङ्गमं च पतत्रि चेत्यत्र प्राणीति व्यर्थं स्यात् । वामदेवश्च "एतेन" प्रागुक्तात्मसामा-न्यान्तर्गतेन प्रज्ञेन मनःसहितेन जीवात्मना 'अस्माल्लोकात्' उत्क्रम्य दिव्यशरीरेण पर्य्यवसित-कामभोगी मनः संबन्धरहितो मुक्तोऽभवत् इति "स एतेन" इत्यादेः उपसंहारवाक्यस्यार्थः पर्य्यवसन्नः ।...............तस्माच्चाद्वैतमितरेणेत्युत्यर्थः । अत्रेत्थमुच्यते,—आदौ तावत् क आत्मा उपास्य इति सामान्येन प्रश्नः, ततः एकस्यैव विज्ञानात्मनः प्रपदचक्षुरा-दिसम्बन्धात् सोपाधिकतया, विज्ञानरूपेण निरुपाधिकतया च श्रुत्या उपलम्भात् तयोः विशेषनिर्धारणायापरः प्रश्नः, इत्युक्तं प्राक् । नास्त्यत्र जातिव्यक्त्योः प्रसङ्गः । यश्च मालाकृतां प्रश्नस्य जातिविषयत्वे हेतुनिर्द्देशः,—"कतर इति निर्देशादि"ति सशब्दप्रामाणिकानां नितरां हेय एव । द्वयोरेकस्य निर्द्धारणे हि किं यत् तदो डतरत् प्रत्ययं स्मरन्ति शाब्दिकाः, तथाच सूत्रं "किं यत् तदो निर्द्धारणे द्वयो-रेकस्य डतरच्" यथा अनयोः कतरः देवदत्त इति नह्यत्रास्ति जातिसम्बन्धः । डतमच्प्रत्ययविषये कदाचित् जातिसम्बन्धदर्शनात् मन्ये दर्शनाचार्य्यवर्य्यस्यायं भ्रमः समजनि । तथाच तत्र सूत्रम् "बहूनां जातिपरिप्रश्ने डतमच्" इति । वस्तुतः अद्वैतपक्षे प्रश्नस्य युक्तत्वम् प्रदर्शितम् प्राक् । "येन पश्यतीत्यादीनां प्रश्नावयवानां उत्तरत्वप्रकल्पनम् अबोधविजृम्भितमिव । एकस्य मनसः वृत्तिभेदेन भिन्नानां संज्ञानमाज्ञानमित्यादीनां दृष्टिप्रभृतीनाञ्च चक्षुरादीनां वृत्तीनां "सर्वाण्येतानि प्रज्ञानस्य (आत्मनः) नामधेयानीति स्वयमेव श्रुत्या आत्मत्व-निषेधात्, "प्रज्ञानं ब्रह्मे"ति विशिष्टोत्तरस्य वक्ष्यमाणतया विशेषणापेक्षाभा-वाच्च । संज्ञानमाज्ञानमित्यादिशब्दानां चेतनसामान्यरूपार्थे स्वमनीषया परिकल्प्य चान्त्यप्रश्नस्योत्तरप्रकल्पनम् प्रहृदन्याय्यम्, अस्याः श्रुतेः संज्ञानादीनां आत्मत्व-निषेधे तात्पर्य्याद् आत्मस्वरूपप्रतिपादनपरत्वाभावेन उत्तरत्वायोगात् । अथ संज्ञानमाज्ञानमित्यादिशब्दानां चेतनसामान्यार्थकत्वे, किं प्रश्ने 'उतरक

प्रत्ययश्रवणं मानम्, उत तत् सहचरितानां सर्वेषां चेतनत्वश्रवणम् ? नाद्यः तस्य प्रत्युक्तत्वात्, नापि चरमः पञ्चमहाभूतानां पृथिव्यादीनां स्थावराणाञ्च चैतन्यात् । नापि च न्यायमते सर्वेषां ब्रह्मादिस्थावरान्तानां प्रज्ञानेत्रत्वं प्रज्ञाप्रतिष्ठत्वं प्रज्ञानस्य च ब्रह्मत्वं सम्भवति । यत्तु महाभूतानीति तदभिमानिदेवतापर मिति कष्टकल्पनं तत्' मुख्यार्थपरित्यागात् प्रकृतानानुकूलत्वाद् उपसंहारविरोधाद् इन्द्रप्रजापत्यादीनां पृथगुल्लेखाच्च नितरां हेयम् । "यद्यद्वै तपरं स्यात् यत् किंचेदं प्राणि जङ्गमं चेत्यत्रप्राणीति व्यर्थं स्यादि"ति यद् वर्णितम्, तद् अनुक्तप्राणिमात्रसंग्रहार्थत्वेन प्राणिशब्दस्य सार्थक्यात् व्यर्थत्वोद्भावनस्य सुतरामशक्यत्वा दतिसाहसमेव । तन्मते एव "यत् किंचेदं प्राणी"ति वचनाद् वृक्षादीनामपि स्थावरजीवानां ग्रहणासम्भवाद् व्यर्थं जङ्गमग्रहणम् । अस्मद्व्याख्यानेतु जडानां ग्रहणाय तस्य सार्थक्यात् नास्ति दोषगन्धोऽपि । भवति तु जडानामपि अधिष्ठानतया ब्रह्मैव स्वरूपम् रजतस्येव शुक्तिका । परयन्थस्य च पूर्वोक्तव्याख्यानेनैव प्रत्युक्तत्वाद् अत्र विरम्यत, इत्यवधृतम् अद्वैते तात्पर्यं ऐतरेयोपनिषदः ।

(क्रमशः)

ग्रन्थ-विमर्शः ।

(क) नाटकीयम् ।

श्रीएककड़िकविरचेन सङ्कलितं पुस्तकमेकम् । नाटकसम्बन्धादस्य नाटकीयमिति नामधेयं कृतं ग्रन्थकृता । अस्यत्र अभिज्ञानशकुन्तलं, मृच्छकटिकं, मुद्राराक्षसं, रत्नावल्युत्तरचरितञ्चोत्तरोत्तरं विशदया चित्रभाषया वर्णितम् । वर्त्तते च देवभाषाप्रसारविहीनेऽस्मिन् वर्त्तमानसमये शीतर्त्तौ कमलविकाशस्येव संस्कृतपुस्तकप्रकाशस्य परमादरप्राप्त्यधिकारिता । अस्य पुनः पुस्तकस्य अनेक नाटकप्रकरणादीना मपूर्वरससमावेशतो विविधकुसुमगन्धनन्दितस्य मन्दगन्धवहस्येव विदुषां सुखसेव्यता समुद्भूतेति मन्ये । एतत्पठनेन च सुकुमारमतीनां बालानामपि तत्तन्नाटकादीनां बोधसौकर्य्येण संस्कृतोक्तिषु पाटवेन च भाव्यम् । अतो दुरवगाहायां देवभाषायां प्रवेशलिप्सुभिः प्रवेशिकापरीक्षार्थिभिरपीदं पठनीयम् । इति शम् ।

(ख) दशकर्म्मदर्पणम् ।

कामरूपान्तर्गतबरशालाग्रामनिवासिना पण्डितप्रवरेण श्रीमता रूपेश्वर-शर्म्मस्मृतिरत्नभट्टाचार्य्येण 'दशकर्म्मदर्पण'ग्रन्थप्रणयने तावदनल्पप्रयासः स्वीकृतः । तेन कृतकृत्यश्चायं पण्डितवर्य्य इति मन्यामहे । यतोऽयं ग्रन्थेऽस्मिन् विवाहादि-व्यवस्थानिर्णयकौशलप्रदर्शनेन विमोहयति विद्वज्जनगणमानसम् । सन्निवेश्य च ज्योतिषप्रकरणं स्वकृतव्याख्यया तदतीव सुस्पष्टं सम्पाद्य तच्छास्त्रानभिज्ञानामपि सुज्ञेयमकरोत् किमुत किञ्चिज्ज्ञानाम् । तस्मादयं स्वीयासाधारणप्रतिभया पूर्व-पूर्वस्मृतिनिबन्धकारेभ्यः नातिरिच्यते नेति विवेकः । ग्रन्थेऽस्मिन् विवाहादि-व्यवस्था, योटकविचारः, लग्ननिरूपणं, सापिण्ड्यादिविचारः, उपनयनव्यवस्था, प्रायश्चित्तपरिपाटी, इत्याद्यनेकविषयाः सन्निविष्टाः । बहुलायासं स्वीकृत्य यदाहृतमनेन धर्म्मशास्त्राब्धिरत्नं तेन धर्म्मैकधनानां भारतीयानां महोपकृतिर्भ-विष्यति इति ।

यद्यप्येवं तथापि महामहोपाध्यायशूलपाणिरघुनन्दनप्रभृतिप्रसिद्धस्मृतिनि-बन्धकारमतविरुद्धं, नानादेशीयव्यवहारविरुद्धञ्च, स्त्रीकर्त्तृककन्यादाने नान्दी-श्राद्धविधानं, पितरि पितामहे प्रपितामहे च जीवति दशमपुरुषपर्य्यन्तसापिण्ड्य-विधानञ्च, तथा तत्र तत्र तत्तन्मतदूषणञ्च, युक्तमयुक्तम्वेति विवेचनीयं स्मृत्या-दिशास्त्राध्यापकपण्डितप्रवरैरिति ॥

वासुदेवमननम् ।

वेदान्तप्रकरणम् ।

वेदान्तगुरवे नमः ।

सर्वतन्त्रस्वतन्त्राय सदात्माद्वैतवादिने ।
श्रीमते शङ्करार्याय वेदान्तगुरवे नमः ॥ १ ॥
योऽवतीर्णो रहाचार्यरूपेण यतिनां मुदे ।
श्रीमन्नारायणं वन्दे तं हरिं करुणाकरम् ॥ २ ॥
मननाख्यप्रकरणं वासुदेवयतीश्वरैः ।
रचितं विस्तरेणाद्य संग्रहेण प्रकाश्यते ॥ ३ ॥
बालाना मुपकाराय ममापि ज्ञानसिद्धये ।
तत्र श्रीबालगोपालकृष्णः संनिहितो भवेत् ॥ ४ ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः, नित्यत्वात् । "न स पुनरावर्तते" इति श्रुतेः । इतरेषां त्रयाणां न तथात्वम्, अनित्यत्वात् "तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति श्रुतेः । स मोक्षः ब्रह्मज्ञानादेव सिध्यति । "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय" "ब्रह्मविदाप्नोति परं" इत्यादि श्रुतिभ्यः तद्ब्रह्म च अध्यारोपापवादाभ्यां ज्ञातव्यम् । अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्वनिर्णयः । "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु" रितिवचनात् । तस्मात्-मुमुक्षुणाऽध्यारोपापवादाववश्यं ज्ञातव्यौ । अध्यारोपो नाम-शुक्तिकायां रजतवत् रज्जौ सर्पवत्, स्थाणौ पुरुषवत्, निष्प्रपञ्चात्मवस्तुनि प्रपञ्चारोपः । अयमध्यारोपो वस्त्वज्ञानादागतः, तदज्ञानमेवाविद्या तमः । मोहः मूलप्रकृतिः प्राधान्यगुणसाम्यं अव्यक्तं मायेति चोच्यते । मूलप्रकृतिर्नाम शुक्लरक्तकृष्णतन्तुसमवायरूपरज्जुवत् सत्वरजस्तमोगुणसमुदायरूपा । अस्याः प्रलयः महासुषुप्तिरिति नाम अस्यां मूलप्रकृतौ अनेककोटिजीवाः स्वस्वकर्मवासनाभिः सह जतुखण्डे सुवर्णरेणव इव सृष्टेः पूर्वं लीना वर्तन्ते । अयमनुभवः सकलजनानां सुषुप्त्यवस्थायामस्ति । सा मूलप्रकृतिः सृष्टिकाले परिपक्वजीवकर्मवशान्माया, अविद्या, तामसीति त्रिविधा जाता । तत्र माया शुद्धसत्त्वप्रधाना तत्प्रतिबिम्बितं सत् सृष्टेः पूर्वं विद्यमानं ब्रह्मचैतन्यमीश्वर इत्युच्यते । तस्याव्याकृतः अन्तर्यामीति नाम, सा एव जगत्स्रष्ट्री सा एव ब्रह्मचैतन्यरूपेण तमस्यवच्छिन्नं सत् जगदुपादानं भवति । तन्तोरूर्णनाभिवत् स्वोपाधिप्राधान्येन उपादानकारणं, स्वप्राधान्येन निमित्तम् । अयमीश्वरः केन प्रकारेण जगत्सृष्टवान् इति चेत् ? उच्यते-पूर्वोक्ताऽविद्या बहुप्रकारा अनन्ता, तदविद्याप्रतिबिम्बितचैतन्यरूपा, जीवा अपि अनन्ताः अनयोर्जीवेश्वरयोः व्यष्टिरूपा अविद्या, समष्टिरूपा मूलप्रकृतिश्च, क्रमेण कारणशरीरे तयोः कारणशरीरयोः जीवस्य ईश्वरस्य च सुषुप्त्यवस्था तयोः स्वस्वकारणशरीरमेव आनन्दमयः कोशः, एवं कारणप्रपञ्चसृष्टिः ।

अथ सूक्ष्मप्रपञ्चसृष्टिरुच्यते ईश्वरस्येक्षणवशात् तमोगुणरूपा प्रकृतिः-आवरणशक्तिः विक्षेपशक्तिरिति द्विविधा जाता, तत्र विक्षेपशक्तिरेव सूक्ष्माकारा अभवत् । आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी-एतेषां पञ्चभूतानां सूक्ष्मभूतानि अपञ्चीकृतानि तन्मात्राणि चेति नाम एतेषामेव सत्वरजस्तमोगुणकारणादज्ञानादागताः सन्तः एतेषामाकाशादीनां पृथक् पृथक् सत्त्वगुणांशात् श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमिति पञ्चज्ञानेन्द्रियाणि क्रमेण जातानि आकाशादिसत्वसमष्ट्याऽन्तः

करणं जातं मनोबुद्ध्यऽहंकारचित्तभेदेन चतुर्विधं तत्र बुद्धौ ऽहंकारस्य मनसि चित्तस्यान्तर्भावः । एवमाकाशादिरजोगुणांशात् वाक्पाणिपादपायू-पस्था इति पञ्च कर्मेन्द्रियाणि जातानि । आकाशादिरजोगुणसमष्ट्या प्राणो जातः प्राणापानसमानोदानव्यानभेदेन पञ्चविधः एतज्ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनोबुद्धिश्च सप्तदशात्मकीभूय सूक्ष्मशरीरं लिङ्गशरीरमुच्यते । इदमेव भोगसाधनं अस्मिन् सूक्ष्मशरीरे जीवेश्वरयोरवस्थितिः स्वप्नावस्था अस्मिन् विज्ञानमयकोशः मनोमयकोशः प्राणमयकोशश्च सन्ति । एवं सूक्ष्मसृष्टिप्रकारः । अथ स्थूलसृष्टिप्रकार उच्यते तमोगुणप्रधानानि अपञ्चीकृतानि आकाशादीनि पञ्चापि भूतानि प्रत्येकं द्विधा विभज्य तत्र प्रत्येकं अर्द्धं चतुर्धा विभज्य सार्द्धभागं विहाय इतरभागेषु संयोजनं पञ्चीकरणम् । एवं कृते पञ्चापि पञ्चीकृतानि भवन्ति । एतेभ्यः पञ्चभूतेभ्यः ब्रह्माण्डं तदन्तश्चतुर्दशभुवनानि । तेन चतुर्विधस्थूलशरीराणि अन्नापि भोग्यवस्तूनि जातानि । अस्मिन् स्थूलशरीरे जीवेश्वरयोरवस्थानं जाग्रदवस्था, एवं स्थूलमेवान्नमयकोशः एवं स्थूलसृष्टिप्रकारः । इदं कारणशरीरं इदं सूक्ष्मशरीरं इदं स्थूलशरीरं प्रत्येकं व्यष्टिसमष्टिभेदेन द्विविधम् । वनं ग्राम इत्यादिसमष्टिः वृक्षो गृहमिति व्यष्टिः । एवं सर्वशरीरं समष्टिः एकशरीरं व्यष्टिः तत्र समष्ट्युपाधिक ईश्वरः व्यष्ट्युपाधिको जीवः । तत्रापि कारणसमष्ट्या ईश्वरः कारणव्यष्ट्या प्राज्ञः, सूक्ष्मसमष्ट्या हिरण्यगर्भः सूक्ष्मव्यष्ट्याः तैजसः, स्थूलसमष्ट्या वैश्वानरः स्थूलव्यष्ट्या विश्वः । इति जीवेश्वरयोरवान्तरभेदः । अयमेवेश्वरः सत्वरजस्तमोगुणैः उपाधिभिः ब्रह्मविष्णुरुद्ररूपेण सृष्टिस्थितिसंहारान् करोति । ब्रह्मणो विराड्रूपेणान्तर्भावः । विष्णोर्हैरण्यगर्भेऽन्तर्भावः रुद्रस्येश्वरेऽन्तर्भावः एवं प्रपञ्चोत्पत्तिः अयमेवाध्यारोपः, इदं विक्षेपशक्तिकार्यं आवरणशक्तिकार्यमुच्यते, ईश्वरस्य आत्मज्ञानिनं च विहायान्येषां सर्वेषां जीवानां पञ्चकोशानां आत्मनश्च भेदमावरणशक्तिरन्धकारः इति या व्यावृणोति, आवरणं द्विविधम् । असत्वावरणं अभानावरणञ्चेति, वस्तु नास्तीति व्यवहारकारणमसत्वावरणं वस्तु न भातीति व्यवहारकारणमभानावरणम् । आवरणशक्तिकार्यमेव संसारवृक्षस्य मूलम् । न विक्षेपशक्तिकार्यं, एतन्मोक्ष-सिद्धेरपि हेतुः । द्विविधमावरणं तत्वज्ञानेन विनाश्यम्, तत्त्वज्ञानं च परोक्षज्ञानमपरोक्षज्ञानञ्चेति द्विविधम् । तत्र गुरुमुखाद् वेदान्तज्ञानजातं परोक्षज्ञानं, इदमेवश्रवणं, अनेन,, वस्तु नास्तीति एवं रूपमसत्वावरणं विनश्यति । तदा वस्तु-इति व्यवह्रियते । श्रवणेन संशयं मननेनासम्भावनां निदिध्या-

अनेनविपरीतभावनां च निवर्त्य देहात्मज्ञानवद् ब्रह्मात्मज्ञानं जायमानं अपरोक्षज्ञानम् अनेन वस्तु न भाति इति व्यवहारहेतुरभानावरणं विनश्यति। एवं परोक्षज्ञानेनापरोक्षज्ञानेन च वस्तु न भाति—इति व्यवहारहेतु रावरणवृत्तिस्वरूपमपि विनश्यति। तत्रानर्थनिवृत्तिः। आनन्दज्ञानाप्तिश्च इति स्वप्नावस्थाः सिद्ध्यन्ति। स्वप्नावस्थानामज्ञानमावृतिः तद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः। शोकहति स्तृप्तिर्निरंकुशेति। एवमाकाशवन्निर्मले चैतन्यवस्तुनि मिथ्याभूतप्रपञ्चकल्पनम् अध्यारोपः अपवाद उच्यते। कारणव्यतिरेकेण कार्यं नास्तीति बोधनं शुक्तिकाया रजतवत्, रज्जौ सर्पवत्, ब्रह्मणि प्रपञ्चो नास्तीति निषेधोऽपवादः। या मा सा माया या न विद्यते सा अविद्या इति व्युत्पत्त्या मायायाः कल्पितत्वं सिद्धम्। एवं यो ब्रह्मव्यतिरेकेण किमपि नास्ति मद्ब्रह्मैवेति विचार्य जानाति। स एव जीवन्मुक्तः। इति वेदान्तसिद्धान्तः। इतिमनने प्रथमवर्णकः समाप्तः।

अथ द्वितीयवर्णके अनुबन्धचतुष्टयमुच्यते—विषयः, प्रयोजनं, सम्बन्धः, अधिकारीति अनुबन्धचतुष्टयम्। अस्य वेदान्तशास्त्रस्य ब्रह्मैव विषयः। मोक्ष एव प्रयोजनम्, प्रतिपाद्यप्रतिपादकभावो बोध्यबोधकभावो वा सम्बन्धः। साधनचतुष्टयसम्पन्नोऽधिकारी यथा बृहस्पतिसवने ब्राह्मणः, राजसूये क्षत्रियः, तथा वेदान्तशास्त्रे साधनचतुष्टयसंपन्न एवाधिकारी—साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः इहामुत्रापि फलभोगविरागः इह स्रक्चन्दनवनितादिविषयभोगः, अमुत्राप्सरःस्त्रीविषयभोगश्चोभयमपि अनित्यमिति मूत्रपुरीषादिवत् तत्र वैरस्यमिहामुत्रार्थफलभोगविरागः शमदमोपरतितितिक्षासमाधानश्रद्धा इति शमादिषट्कम्, शमो नाम श्रवणादिव्यतिरेकेभ्यः निवृत्यात्मन्येव श्रवणादिमनःस्थापनं, दमो नाम ज्ञानकर्मेन्द्रियनिग्रहः उपरतिः संन्यासः निष्कामकर्मानुष्ठानम् व्यवहारलोपो वा। तितिक्षा-प्रारब्धागतशीतोष्णादिसहनं, समाधानम् श्रवणाद्यनुगुणविषयेषु प्रवर्त्तनम्। श्रद्धा गुरुवेदान्तवाक्यविश्वासः। गृहे दह्यमाने तत्र स्वयं दह्यमानःपुरुषः कलत्रपुत्रादिकं परित्यज्य स्वतापोपशमनार्थमेव बहिर्निर्गत्य तापोपशमनं कर्त्तुमिच्छति। एवं सांसारिकतापशमनं संपादयितुं त्यक्तसर्वैषणस्य तीव्रेच्छा प्रमोक्षे मुमुक्षा, लोके केषांचित् नित्यानित्यवस्तुविवेके सत्यपि वैराग्यस्यादर्शनाद् इहामुत्रफलभोगविरागेण भवितव्यमिति, उक्तम्। तदुभये सत्यपि केषांचिद् कवीश्वराणां कोपतापादिदर्शनात् शमादिना भवितव्यमिति उक्तम्। एतत्त्रितये सत्यपि केषांचित् भक्त्या ईश्वरोपासकानां ज्ञानाधिकारादर्शनात् मुमुक्षया भवितव्यम्। एवं रूपाधिकारी उपहार

समित्पाणिः सन् सद्गुरुमुपगम्य नमस्कृत्य विश्वासविनयाभ्यां सह हे स्वामिन् हे भगवन् गुरो इति संबोध्य जीवः कः? ईश्वरः कः? जगत् कीदृशं? एतत्त्रितयं कस्मादागतम्? क्व गमिष्यति? इति प्रश्नं कुर्य्यात्। "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादि श्रुतेः। "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया" इति गीतावचनाद्, एवं शिष्येण प्रार्थितः सद्गुरुः दयया सत्त्वरजस्तमोगुणैः जीवेश्वरजगदागमनप्रकारं बोधयित्वा आत्मस्वरूपमपि करतलामलकवद् बोधयति। अस्याधिकारिणः साधनचतुष्टयं च बहुजन्मार्जितसुपुण्यवशाद् ईश्वरानुग्रहेण च लभ्यमिति वेदितव्यम्। एतत्तत्त्वप्रदायकं गुरुं ईश्वरं विद्यात्। एवं यः गुरुमुखात् जीवात्मपरमात्माभेदं विचार्य जानाति, स एव मुक्तिं गमिष्यति इति सिद्धम्। इति द्वितीयो वर्णकः समाप्तः।

अयं प्रपञ्चः कतिविध इति चेत्? आत्मा अनात्मा इति द्विप्रकारः। प्रपञ्चातीतस्यात्मनः कथं प्रपञ्चान्तर्भूतत्वम्? इति न शङ्कितव्यम्। कथमिति चेत्? अस्य प्रपञ्चस्य चेतनाचेतनात्मकत्वाद्, आत्मनश्चेतनारूपत्वात्, आत्मानं विना प्रपञ्चस्याभावाद् आत्मनः प्रपञ्चान्तर्भावो वक्तव्यः। एवं, तर्हि चेतनं किम्? अचेतनं च किम्? इति चेत्, जङ्गमं सर्वं चेतनं, स्थावरं सर्वम् अचेतनम्, तर्हि चेतनानामचेतनानां प्रत्येकं बहुप्रकारकत्वात् कथं द्विप्रकारः प्रपञ्च इति चेत्? अनात्मा एक एव कार्यरूपेणानेकोऽभूत् आत्मा अपि एक एव सोऽपि अनात्मकार्योपाधिभिरनेक इति अनेकेश्वरा इति भ्रान्तिः; एकस्येश्वरस्य जीववत् कथमनेकत्वमिति चेत्? पुण्यारण्येषु ग्रामेषु शिवविष्ण्वादिमूर्तिभेदेन स्थितत्वादिति ब्रूमः, मृच्छिलादिरूपाणामासां मूर्तीनां कथमीश्वरत्वमिति चेत्? ईश्वरत्वमस्ति, सर्वैरपि तासु मूर्तिषु बहुद्रव्यव्ययं कृत्वा अभिषेकनैवेद्यादिभिः पूजनस्य क्रियमाणत्वाद्। येषां शास्त्रे विश्वासो नास्ति म्लेच्छादयस्ते मूर्तीनां पूजने नोदाहरणीयाः। सर्वत्र श्रद्धावतामेवोदाहरणीयत्वात्। किञ्च हेयमलमूत्रात्मकेऽस्मिन् शरीरे आत्मबुद्धिं कुर्वतां जीवानां अत्यन्तशुद्धासु मूर्तिषु ईश्वरबुद्धिकरणे को दोषः? एवं एकस्यात्मनोऽनन्तकार्योपाधिभिरनेकत्वे च दृष्टान्तः कः इति चेत्? यथैकैव पृथिवी कार्यरूपेण परिणता सती पर्वतः वृक्षः गोपुरं कुड्यं घटं कुसूलं मठः शरावः इत्यादिभेदं गच्छति। यथा आकाश एक एव पृथिवीकार्योपाधिषु प्रविष्ट एव प्रतीयमानः, अयं घटाकाशः अयं मठाकाशः इत्यादिरूपेणा-

नेकधा भाति । तथा मूलप्रकृतिः अनात्मा एकैव कार्यरूपेणानेका जाता । आत्मा स्वयमेकोऽपि तत्तच्छरीरोपाधिभिरन्तःप्रविष्ट इव सन् देवः मनुष्यः रामः कृष्णः ब्राह्मणः क्षत्रियः वैश्यः शूद्रः पशुः पक्षी कृमिः कीटः इति बहुधा भाति । अयमवच्छेद पक्षे दृष्टान्तः । प्रतिबिम्बपक्षे तु समुद्रः नदी तडागः कूपः घटः जलमिति । एकमेव जलं यथा बहुधा जातं तेषु समुद्रादिषु आदित्य एक एव प्रतिबिम्बितः सन् बहुधा जातः तथा एक एवात्मा अन्तःकरणसहितेषु सर्वेष्वपि शरीरेषु प्रतिबिम्बितः सन् अनेको जातः इत्युभयत्रापि दृष्टान्तो ज्ञातव्यः । यथा जलधर्मा शीतकिरणादयः प्रतिबिम्बितमादित्यं न स्पृशन्ति तथान्तःकरणधर्मा कर्तृत्वभोक्तृत्वविकारा अपि तदन्तःकरण-निष्ठचिदाभास एव भान्ति । विश्वभूतिमात्मानं न स्पृशन्ति । तस्मात् जीवात्मैव परमात्मा परमात्मैव जीवात्मा । कथमिति चेत् ? यथा घटाकाश एव मठाकाशः मठाकाश एव घटाकाशः एवमिति जानीहि । जीवात्मनः कल्पितत्वात् । कथं सत्यपरमात्माभेद इति चेत् ? पारमार्थिकः व्यावहारिकः प्रातिभासिकः इति जीवः त्रिविधः । एते जीवाः क्रमेण जाग्रत् स्वप्न सुषुप्त्याभिमानिनः । यथा जले तरङ्गः कल्पितः तरङ्गे फेनः कल्पितः पारमार्थिके व्यावहारिकः कल्पितः व्यावहारिके प्रातिभासिकः कल्पितः । माधुर्यद्रवशैत्यादीनि पारमार्थिक जलनिष्ठान्येव सन्ति तरङ्गे भान्ति । तद्द्वारा फेने भान्ति । तद्वत् कूटस्थसच्चिदानन्दाः कूटस्थपारमार्थिकनिष्ठाः सन्तः व्यावहारिके भान्ति । तद्द्वारा प्रातिभासिके भान्ति । यथा फेनः तरङ्गं विना नास्ति । तरङ्गोऽपि जलं विना नास्ति । जलं तु पारमार्थिकमूलम् । एवं प्रातिभासिको व्यावहारिकं विना नास्ति । व्यावहारिकोऽपि पारमार्थिकं विना नास्ति । तस्मिन् यथा पारमार्थिकत्वेन घटाकाशो मठाकाश एव, पारमार्थिककूटस्थपरमात्मा इति सिद्धान्तः । एवं यो नेति नेति वाक्येन देहादिपञ्चकोशेभ्यः पारमार्थिककूटस्थं पृथक्पृथक्कृत्य तं पारमार्थिकं कूटस्थं अहमिति जानन् सन् त्वं अहं ब्रह्मास्मि" । इति श्रुतिविचारेण युक्तिभिः दृढनिश्चयेन च साक्षात्कृत्य तिष्ठति । स एव परिपूर्णब्रह्मस्वरूपः तमेव पापपुण्य-कर्माणि न स्पृशन्ति । सर्वा अपि उपनिषदः एकतात्पर्य्येण पुष्यन्ति ।

इति मनने तृतीयवर्णकः समाप्तः ॥

भीष्मचरितम् ।

प्रथमवर्षीयप्रथमखण्डस्य ७३ पृष्ठतोऽनुवृत्तम् ।

"सम्पत्तौ च विपत्तौ च महतामेकरूपता" इत्येतन्महाजनवाक्यं भीष्मजीवने सविशेषमुपपन्नम् । सर्व्वशास्त्रपारंगमो विद्याविनयसम्पन्नोऽसौ प्रजाभिः सम्मानितोऽपि न दिद्रेके) । पितृभ्रातृभ्रातुष्पुत्रवियोगविधुरोऽसौ पुनर्नितरामभिभूयमानो हा हतोऽस्मि इति ब्रुवाणः नोपैक्षिष्ट कर्त्तव्यम् । पुनः शरशय्यामधिशयानः सहस्रैः निशिताग्रैः शरै र्विध्यमानोऽपि क्लेशव्यञ्जकं स नाब्रवीद्वाक्यम्। महतां महत्त्वमटलमचलञ्च विराजते। निदाघप्रचण्डमार्त्तण्डकरसहस्रेणाक्रम्यमाणोऽपि गाम्भीर्य्यादच्युतः सरित्पतिरिव भीष्मो दैहिकयन्त्रणया अविह्वलचित्तः प्रफुल्लवदनश्चासीत् । "न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्" इति भगवद्वाक्यतात्पर्य्योपलब्धिः सम्यक् कृताऽनेन । इत्थम्भूतगुणे भीष्मे कथं न स्निह्येद्धृदयं भागवतम् ?

संयमिनां वरिष्ठस्य भीष्मस्य कर्त्तव्यज्ञानं कर्त्तव्यनिष्ठा च परमे आस्ताम् । पितुर्दारान्तरपरिग्रहाभिलाषं ज्ञात्वैव आत्मकर्त्तव्यं तदादैव स्थिरीचकार । प्राणैरपि पितृतुष्टिर्वाञ्छनीया इत्याशयस्तस्य । त्यक्तराज्यकलत्रो भीष्मो निर्वेदात् तपसे वनं न ययौ । गुरुशुश्रुषा तस्य कर्त्तव्यान्तरमासीत् । पितरि स्वर्यातेऽपि स गृहत्यागं न चकार । भ्रात्रोः ततो भ्रातुष्पुत्रयोः, तत्पौत्राणाञ्च ततः प्रतिपालनं शिक्षाविधानञ्च कर्त्तव्यानि तस्यासन् । इत्थं सेवाव्रतेनास्य जीवनमगात् । उपेक्ष्यमाणोऽपि स दुर्य्योधनाय उपदेशं प्रददौ । हिताकाङ्क्षिणस्तस्य उपदेशप्रदानं कर्त्तव्यमासीत् । अहो ! ईदृशः प्रभेदो विद्यते चरित्रेषु विभिन्नवृत्तीनां भिन्नरुचीनां मनुष्याणाम् । कर्त्तव्यानुरोधाद् अप्रतिहताधिकारं समग्रं समृद्धञ्च यद्राज्यं वाक्येनैकेनैव चिराय परित्यक्तं भीष्मेण, तस्यार्द्धस्य लाभाय एव पापमतिः क्रूरो दुर्य्योधनो, न्यायभ्रष्टमात्मानं घोररूपे महाहवे भ्रातृविग्रहे निक्षेप्तुमपि नैव सङ्कोचमनुबभूव ।

कौरवपाण्डवयोः सममतिर्भीष्मः कर्त्तव्यज्ञानादेव प्रतिपालकस्य दुर्य्योधनस्य पक्षमवालम्बत । अथ महावीरे धनञ्जये परिहितदीनवासपि पितामहं भीष्ममासाद्य कृतचरणवन्दने, अनिवार्य्याभ्यर्णमहाहवे तेन सह योद्धुमनुमतिं याचितवति च, प्रीतिवारिपूर्णेक्षणो भीष्मस्तं स्वोत्सङ्गे आरोप्य उवाच "वत्स

अनुमतियहणार्थमागते त्वयि प्रीतोऽस्मि परम् । अनुजाने निःसङ्कोचं क्षात्रं धर्म्मं प्रतिपालय । ' अर्थस्य पुरुषो दासः, नार्थं दासो हि कस्यचित् ' प्रतिपालकस्य परित्यागी धर्म्मभ्रष्टो भवति । कृतघ्नस्य च न निष्कृतिः । उक्तञ्च–

" ब्रह्मघ्णे च सुरापे च चौरे भग्नव्रते शठे ।
निष्कृति र्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥"

कौरवपक्षस्यान्याय्यस्यापि समर्थनं कौरवान्नप्रतिपालितस्य मे कर्त्तव्यम् । प्रतिपक्षमवलम्बमानाय मे मा क्रुध्यतां युष्माभिः । श्रीकृष्णसहायस्य आशीरन्यर न ते योज्या । शिवमस्तु ते । " ततो विरते भीष्मे तमभिवाद्यार्ज्जुनः प्रस्थितः । यथा स्वर्गस्थोऽपि इन्द्रः लोकलोकस्य सुखावहस्तथा कुरुसभास्थोऽपि भीष्मः पाण्डवानां हितकारी आसीत् । न्यायपक्षस्तु राज्ये वैधाधिकाराणाम् पाण्डवानाम् । परं प्रबलं कर्त्तव्यज्ञानं कृतज्ञता च भीष्मं कौरवपक्षे नियोजयामासतुः । स्वेच्छाधीनमृत्युः ब्रह्मचार्य्यपि स कर्त्तव्यानुरोधेनैव संसारशोकतापानलेन आत्मानमदहत् । नैव संसारशोकक्लिष्टां तनुं तत्याज, सन्यासमवालम्बत वा ।

कर्त्तव्यनिष्ठस्य गाङ्गेयस्य देशचर्य्यापि वरणीया । त्यक्तराज्योऽपि स यावज्जीवं राज्यस्य हितं विदधौ । अप्राप्तवयसि विचित्रवीर्य्ये स एव बाहुबलेन राज्यं बहिःशत्रुभयादरक्षत् । पुनर्मृते भ्रातरि, सिंहासनारोहणायानुज्ञातः प्रचोदितोऽपि स राज्यं न स्वीचकार परं जगतो गुर्वीं धुरं भुजबलेन प्रतिभूरिवोवाह । चिरं तेन प्रजाधर्म्मोऽवलम्बितः, देशभक्त्याः परा काष्ठा प्राप्ता च । विपद्यपि अविकृतचेता महत्त्वस्य महानाधारः पुरुषवर्य्यो भीष्मः देशचर्य्यारूपस्वकर्त्तव्यसाधनाच्चिरमपराङ्मुखोऽभूत् । कथोक्तमत्र–

कर्त्तव्यपालने कीदृक् को वेत्ति भीष्मतोऽपरः ।
कर्त्तव्यस्यानुरोधाद्यो भेजे कष्टं परार्थतः ॥
सेवाव्रतो मानदश्चामानी देशहिते रतः ।
कृतज्ञतां स्मरन् यश्च युयुधे पाण्डवैः प्रियैः ॥

प्रतिज्ञापालनं हि क्षात्रधर्म्मस्य प्रधानमङ्गम् । कर्त्तव्यपरो भीष्मः स्वप्रतिज्ञानामांशिकव्यतिक्रममपि न चक्रे । पित्रर्थे येऽपि कृताः प्रतिज्ञाः सुकठोरास्तेनानुष्ठिताः यावज्जीवम् । अपुत्रके विचित्रवीर्य्ये परलोकं गते सत्यवती संयतपुत्रशोकावेगा भीष्ममुवाच " वत्स सर्वमवसितं तावदिदानीम् । कृतदारपरिग्रहो राजपदं गृहाण इत्यहमनुजाने । " तच्छ्रुत्वा भीष्म उवाच–

क्षत्राणामत्र सर्व्वस्वं प्रतिज्ञाया हि पालनम् ।
व्रतभ्रष्टो न कांक्षेऽहमाधिपत्यं दिवोऽपि च ॥
सदाशीश्च कृपेशस्य कुरुतां मे व्रतं ध्रुवम् ।
ब्रह्मचर्य्येण तिष्ठामि यावज्जीवो वसेन्मयि ॥

कुरुक्षेत्रसमरे तस्य युद्धसम्बन्धिनी प्रतिज्ञा अचला आसीत् । सव्यसाचिनः अर्ज्जुनस्यापि प्रतिज्ञास्खलनं दृश्यते । अतएव महाप्रस्थानकाले पतितेऽर्ज्जुने कारणजिज्ञासुं भीमसेनं युधिष्ठिरोऽब्रवीत्—

"एकाह्ना निर्दहेयं वै शत्रूनित्यर्ज्जुनोऽब्रवीत् ।
न च तत् कृतवानेष शूरमानी ततोऽपतत् ॥"

इत्थं सत्यव्रतस्य भीष्मस्य कर्म्मजीवनमवसानं गतम् । योगयुक्तः परमात्मनि चित्तं समाधाय सोऽष्टपञ्चाशद्दिनानि तस्थौ । अष्टादशदिवसव्यापिनि महासमरे अष्टादशाक्षौहिण्यः सेनाः यमसदनं गताः । भ्रातृभिः सुहृद्भिश्च सह दुर्य्योधनो रणक्षेत्रे निहतः । पञ्चपाण्डवा हतपुत्रा हतसुहृद आयुःशेषतया जीविता एवासन् । रुधिरप्लावितं सैन्यानां मृतदेहसमाकीर्णं कुक्कुरशृगालैः शकुनिगृध्रिनीनिकरैश्चाकुलं रणक्षेत्रं भयावहामाकृतिं दधार । हतेश्वराणां नारीणां रोदनध्वनिभिर्द्यौरपि विदीर्णाऽभूत् । युधिष्ठिरः बीभत्सव्यापारनिरीक्षणेन परं निर्व्वेदं जगाम । शोकसंविग्नमानसः युधिष्ठिरस्तत्त्वजिज्ञासुः सह भ्रातृभिः ज्ञातिभिश्च शरतल्पगतं कुरुवृद्धं पितामहं भीष्ममभ्येत्य तत्पादावभिवन्द्य तस्थौ । तान् अनुज्ञाप्य उपवेशनाय, भीष्मः धर्म्मतत्त्वजिज्ञासुं गतनिर्व्वेदं युधिष्ठिरं सम्बोध्य धर्म्मस्य निगूढां गतिं प्रकाशयामास । ततः स राजनीतिं दण्डनीतिमर्थनीतिञ्च दानधर्म्मं सत्यधर्म्मं पुराणेतिहासादीन् अशेषेण कीर्त्तयामास । बहुशो युधिष्ठिरस्य हृदयसंशयबन्धनीमच्छिनत् । साधूक्तं भीष्मप्रसङ्गेन महाभारते—

"बृहस्पतिसमो बुद्ध्या क्षमया ब्रह्मणः समः ।
पराक्रमे शक्रसमस्तेजसा हि समो रवेः ॥"

सत्यवदतां वरस्य भीष्मस्य तुल्यः प्रगाढनीतिविच्च दृश्यते लोके । गृहस्थधर्म्ममनास्थितः संसारे अनासक्तोऽस्वीकृतराजधर्म्मोऽपि भीष्मः सर्वशास्त्रपारङ्गम आसीत् । भीष्मः-गार्हस्थधर्म्मस्य राजधर्म्मस्य च निगूढानपि व्यापारान्

युधिष्ठिरमब्रवीत् । मतमिदमाधुनिकानां यद्वैराग्यमाश्रितस्य संसारज्ञानमसम्भाव्यम् । परं नैतत् सत्यमूलकम् । निर्वेदं गतस्य निष्कामकर्म्मणो भीष्मस्य प्रगाढ़ं ज्ञानमेतद्विरस्यति । पतिगृहं गच्छन्तीं शकुन्तलां प्रति संयमधनस्य आजन्मतपस्विनः संसारानभिज्ञस्य कण्वस्य सुनयपूर्णमुपदेशवाक्यञ्चास्य समर्थकम् । तद् यथा—

> शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
> भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
> भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
> यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

सत्यव्रतस्य पितृभक्तस्य गाङ्गेयस्य भगवद्भक्तिरपि अतुलनीया । विविधकर्त्तव्यगुरुभारग्रस्तः अशेषजनानुचरपरिवृतोऽपि शौचसदाचारसम्पन्नो भीष्मो भगवति दृढ़भक्तिरवासीत् । सर्व्वकर्म्माणि तस्य ऐशभक्तिसूचकान्यासन् । दिव्यचक्षुषा तेन कृष्णस्तु भगवान् स्वयमिति परिज्ञातम् । भगवति वासुदेवे तस्याचला भक्तिर्दृश्यते सदैव । सर्व्वथा निवार्य्यमाणापि न कदापि तस्य भक्तिर्विचलितासीत् । समागतायां विपदि सदैव स भगवति मानसं समादधौ । सम्पदि च स हर्षोत्फुल्लः अधीरश्च नाभूत् । सम्पदो विपदश्च सर्व्वमङ्गलविधात्रैव दत्ता, नरेभ्यस्तत्र न किञ्चित् शोचितव्यं हर्षणीयं वास्ति इति तस्य ध्रुवा मतिरासीत् । भगवत्कृपया तस्य कर्म्माणि निर्व्विघ्नं सफलतां प्रापुः । अपुत्रके विचित्रवीर्य्ये पञ्चत्वं गते भीष्मः सत्यवत्या प्रचोदितोऽपि दारपरिग्रहाद्राज्यग्रहणाच्च पराङ्मुखो राज्यरक्षायै वंशरक्षायै च 'पुरुषोत्तमं तुष्टाव । युधिष्ठिरस्य राजसूये चैद्येन गर्हितोऽपि स जगदर्च्चनीयं श्रीकृष्णमेवादौ अर्च्चयितुं युधिष्ठिरमादिदेश । उद्योगकाले एव सन्धिसंस्थापनार्थं श्रीवासुदेवे हस्तिनापुरमागते श्रीकृष्णस्यावरोधात्मकं दुर्य्योधनस्याभिप्रायं शृण्वतो भीष्मस्य नेत्रयोरग्निस्फुलिङ्गा निर्गता इव । भीष्मस्तं निर्भत्सयन् श्रीकृष्णार्च्चनमुपदिदेश, यतः "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।" तत आगते वासुदेवे सह द्रोणादिभिर्भीष्मस्तस्याभ्यर्थनां चकार । भगवति यस्य ईदृशी अचलाभक्ति, भक्तवत्सलो भगवान् ध्रुवं तस्मिन् स्निह्यति, सदैव तद्रक्षणपरो भवति । अतोऽस्ति भगवद्वाक्यं—"मद्भक्तपूजाभ्यधिका ।" अपि च गीतायां—

> "अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
> तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥"

अथ भक्तचूडामणिरर्ज्जुनमित्रोऽपि विमोहितो बभूव । "योगक्षेमं वहाम्यहं स्वयमन्येन वा" इति तस्य संशय आसीत्, भगवान् वासुदेव इदं प्रतिपादयितुमिव कुरुक्षेत्रसमरस्य अष्टमेऽहनि भक्तप्रतिज्ञारक्षार्थमात्मनः अनस्त्रधारणरूपां प्रतिज्ञां व्यर्थां विदधौ । कारणान्तरेण भीष्मो भगवत्प्रतिज्ञाभङ्गात्मिकया प्रतिज्ञया बद्धो बभूव । गतावसादं क्षमताममर्ज्जुनं दृष्ट्वा श्रीहरिस्तं रक्षितुं चक्रपाणि भीष्ममभ्यधावत् । भीष्मो विसृष्टकार्म्मुकास्त्रः प्रसन्नवदनः भगवन्तं स्तुवन्निव बभाषे—

"स्वनिगममपहाय मत्प्रतिज्ञा मृतमधिकर्त्तुमवप्लुतो रथस्थो ।
धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥"

दीनस्य दयसे त्वं मे भगवान् भक्तवत्सलः ।
अनुक्षणमेषा चिन्ता स्वान्तं तर्पयति प्रभो ॥

भीष्मस्य शरशय्यावलम्बनादनन्तरं विनिवृत्ते सहस्रांशौ, प्रवृत्ते चोत्तरायणे, श्रीकृष्णेन ज्ञातिभिश्च सार्द्धं युधिष्ठिरे शरतल्पगतं भीष्ममासाद्य स्तिमितनयनयोरुन्मीलनाय अनुरुध्यमाने, भीष्मः सर्व्वान् परिवारान् दृष्ट्वा, अविकम्पितेन स्वरेण निजगाद "सौभाग्यं मे प्राप्तकालस्य यूयमागताः । निशितेषुशयनमधिशयानस्य अष्टपञ्चाशद्दिनानि गतानि । मासो माघः समनुप्राप्तः शुक्लपक्षश्च प्रवृत्तः ।" ततो देहत्यागाय धृतराष्ट्रप्रमुखै रनुज्ञातो भक्तिगद्गदकण्ठः केशवमुवाच—"हे अच्युत ! पुरा मन्दधी दुर्य्योधनोऽनेकशो मया उक्तः "यतः कृष्णस्ततो धर्म्मो यतो धर्म्मस्ततो जयः" इति । मद्वाक्यमकृतवानसौ दुर्म्मतिरधुना पृथ्वीमिमां समग्रां घातयित्वा स्वयञ्च निधनं गतः । पाण्डवास्ते रक्ष्याः । हे भूतभावन वैकुण्ठविहारिन् अधुना मां प्राण-विसर्ज्जनायानुज्ञातुमर्हसि ।

नरनारायणौ जातौ श्रुतं व्यासमुखान्मया ।
धर्म्मस्य हि रक्षणाय भूभारहरणाय च ॥
तेन त्वयानुज्ञातोऽहं लभेय परमां गतिम् ।
प्रणतोऽस्मि जगन्नाथ नमस्ते कमलापते ॥

ब्राह्मणेषु गुरुषु च अचला भक्तिर्भीष्मस्य । नीतिकथनप्रसङ्गेन नीतिविदां वर उपदेष्टा च भीष्मो बहुशो भक्तब्राह्मणयो र्महिमानं कथितवान् । प्राणविसर्ज्जनाय धृतराष्ट्रप्रमुखैः स्वजनैरनुज्ञातो महाद्युति गाङ्गेयो युधिष्ठिरमुवाच—

"ब्राह्मणाश्चैव ते नित्यं प्राज्ञाश्चैव विशेषतः ।
आचार्य्या ऋत्विजश्चैव पूजनीया जनाधिप ॥"

अन्त्या वागियं भीष्मौष्ठपुटनिःसृता । प्रयाणकालेऽपि इत्यमर्थ्यां भक्तिमूलां वाचं दत्त्वा, निमिषालसपक्ष्मपङ्क्ति वासुदेवस्य ऐश्वरं रूपमवलोकयन् पुष्कलाभिः स्तुतिभि स्तं स्तुवन्नेव भीष्मदेवः परमात्मनि चित्तं समाधत्त । भृगुभरद्वाजसंवादे भरद्वाजकृतस्य किं सुखमिति प्रश्नस्य उत्तरे भृगुणोक्तं—"सच्चिदानन्दरूपतया ज्ञानानन्दावस्था सुखं सुखम् ।" तदेव विमलं सुखं नितरामनुभवन्नासीद् भीष्मः । अचिराद्विहस्तस्य विशल्योऽभवत् । ततः संरुद्धे प्राणवायौ, भीष्मस्य आत्मा भूतसूक्ष्मज्योतिर्म्मेयवपुर्मूर्द्धानं भित्त्वा महोल्केव दिवमभिचलितः, महाकाश एव विलीनो भूत्वा क्षणेनान्तरधीयत । तदैव स्वर्गदुन्दुभयो नेदुः, देवविद्याधर-हस्तमुक्ताः पुष्पवृष्टयश्च पेतुः । सिद्धा ब्रह्मर्षयश्च साधुसाध्विति ऊचुः । देवैः सम्वर्द्धितो महातेजा भीष्मो वसुलोकं प्राप । अष्टमो वसुरेव स महाद्युति र्वसूनां मध्ये शुशुभे । भीष्मः किल पूर्व्वजन्मनि अष्टमो वसुरासीत् । मुने र्गोधनहरणात् तच्छापेन स्वर्गभ्रष्टो भूतले मनुष्यत्वमनुप्राप । इति वर्णितं भीष्मचरितम् ।

नेह दृश्यते क्वचित् ईदृशः समवायो गुणानाम् । रणनिपुणोऽपि अरणप्रियः, शौर्य्यसम्पन्नोऽपि शान्तिप्रियः निरहङ्कारश्च, एहस्यधर्म्मेमनास्थितः संसारेऽना-सक्तोऽपि ज्ञानी सर्व्वनीतिविशारदः, शास्त्रज्ञानसम्पन्नोऽपि मौनी अविकत्थनः, शक्तोऽपि क्षमाशीलः संसारस्थोऽपि योगी भीष्मं विना द्वितीयो न भविता । ईदृशं चित्रं कल्पनयापि रचयितुं न शक्यते । नश्वरे जगत्यस्मिन् भीष्मेणामरता-लब्धा । कतिशो मन्वन्तराणि समतीयुः, न खलु तस्य कीर्त्तिप्रतिमूर्त्तयो बलीय-सानेन कालस्रोतसापि विलोपयितुं शक्यन्ते । अद्यापि महात्मन स्तत्रभवतो भीष्मस्य पवित्रतमं नाम हृदि निधाय तेनैव प्रदर्शिते पथि यावज्जीवनं वर्त्तितु-मुत्सहन्ते सङ्कल्पन्ते वा बहुशो धर्म्मज्ञानपिपासवः । ध्रुवमिदं यद् भीष्मः शापभ्रष्टदेवता । मनुष्येषु ईदृशी सम्पूर्णता न सम्भाव्या । अशाश्वते खलु संसारे तदधिष्ठानं जगतः सौभाग्यम् । साधु खल्विदमुच्यते भीष्मप्रसङ्गेन—

हिमद्युति र्न ह्यकलङ्क एव यः न पद्मिनी या न सुतीक्ष्णकण्टका ।
न वात्र भूतं यददोषमत्ततम् यशोऽस्य हीनाङ्कसुधांशुसन्निभम् ॥

भीष्मचारित्रमाख्यातं बालेन कुधिया मया ।
कृष्णद्वैपायनप्रोक्तं स्वस्ति सन्तो ब्रुवन्तु वै ॥

जातीयस्तोत्रम् ।

आंगलभाषातोऽनूदितम् ।

(१)

ईश पाहि भूभुजम्, जीवतात् सुराट् चिरम्
ईश पाहि नो नृपम् । प्रेर्य्यतां स शत्रुजित्
नन्दितः सगौरवः शास्तये चिराय नः
ईश पाहि भूपतिम् ।

(२)

ईश मुच्यतां धृतिः शात्रवं निरस्यताम्
पात्यतामधश्च तत्, नीतिरस्य मोह्यताम्
कैतवं विफल्यताम् । त्वं हि हन्त नोगतिः
ईश पाहि नः सिमान् ।

(३)

तावकैर्वरोत्तमैः स्तं क्रिराऽनुकम्पया
शास्तु भूपतिश्चिरम् पातु नश्च शासकम्
हेतुरस्तु नः सदा गातुमित्यमुच्चकैः
ईश पाहि भूपतिम् ।

विविधविद्याविमण्डिताय अशेषसद्गुणैकनिलयाय अखण्डप्रभावाय क्षितिपतिकुलवरेण्याय निखिलमानवमर्मास्पदाय चिरायुष्मते पञ्चमजर्जमहोदयाय स्वस्तिभाषणम्—

जयतु जयतु सम्राट् "पञ्चमो जर्जचन्द्रः",
सुरभिकुसुमहारं कीर्त्तिरूपं वरेण्यः ।
सुविमलगलदेशे यस्तु नित्यं विधत्ते,
स किल जगति चास्तां पूर्णचन्द्रप्रकल्पः ॥ १ ॥
श्रीमदुदारचरितं जगदेककीर्त्तिं,
लब्धप्रतिष्ठतिलकं बहुधा विदित्वा ।
त्वामाश्रितोऽहमधुना किमपि प्रयाचे,
निःस्वं दयस्व कृपया त्वरया प्रयत्नात् ॥ २ ॥

चातको जलपानार्थी तृष्णया पीड़ितोऽपि सन् ।
विना सुशीतलं मेघं कूपादिमाश्रयेत किम् ॥ ३ ॥

आतपतप्ततप्तानां प्रीत्यै पूर्णविधुर्यथा ।
तथा किमिह वृक्षाणां छाया स्यात् प्रीतिदायिनी ॥ ४ ॥

शास्त्रेषु कथितं सम्यक् प्रणीतमृषिभिर्बुधैः ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥ ५ ॥

जीवंश्चिरं धर्म्मनिविष्टचित्तो,
दिव्यं सुखं कान्त * गुणोपभुङ्क्ष्व ॥
आशासु ते शुभ्रतमा सुकीर्त्ति,
र्निरन्तरं धावतु चाचिरेण ॥ ६ ॥

क्षत्रियकुलगौरवस्य नानाविद्याविशारदस्य अशेषसद्गुण-पूतचरितस्य पुण्यकीर्त्तेः वर्द्धमानाधिपतेः प्रथम-कुमारीपरिणयकाले

स्वस्तिवादः ।

सर्वानन्दमयी सुधेव शशिनः श्रीवर्द्धमानेश्वरा-
ज्जाता राजकुमारिका भुवि सुधाराणी मनोहारिणी ।
भास्वत्क्षत्रकुलोद्भवो हरिनिभः श्रीनन्दलालाभिधो-
यत्पाणिग्रहणं सुयोग्यमनयोस्तन्मङ्गलायास्तु नः ॥ १ ॥

यद्वामाधवयोर्नगेन्द्रतनयानागेन्द्रकेयूरयोः
स्वाहापावकयोरमर्त्यतटिनीकल्लोलिनीनाथयोः ।
पौलोमीपुरुहूतयो रतिरतिप्राणेशयोः प्रेमवद्
दम्पत्योर्युवयोश्चिरं भवतु तत्सौभाग्यसौख्यान्वितम् ॥ २ ॥

अतिरमणीयाकृत्योः समवयसोःप्रोल्लसत्प्रेम्णोः ।
जायापत्यो र्युवयोः पाणिग्रहणं शिवायास्तु ॥ ३ ॥

---

* कान्तगुण इति संबोधनम् ।

कामवैभवम् ।

प्रथमवर्षीय चतुर्थखण्डस्य २८८ पृष्ठतोऽनुवृत्तम् ।

न केवलं नारीनिमित्तकः कामो मानवानाकुलीकरोति, सर्वेऽपि कामा दोषैकनिलया जनानपथे प्रवर्त्तयन्ति, निपातयन्ति च मोहगर्त्ते, किमन्यत् जीवितादपि वियोजयन्ति । ते खलु कञ्चिद् विषयमुपादाय पुनरपर मुपाददते, न च कुतश्चिदपि विरमन्ति । परराष्ट्रलोलुपा हि राजानः काममोहपराहता बलात् परराष्ट्रमाक्रामन्ति, विपत्तावामानतिं सन्धिमुपायनञ्चोपेक्षमाणा विपुलसेनाचालनेन नररुधिरैरवनीमाप्लावयन्ति ।

किं न पश्यन्ति भवन्तः साम्प्रतं कामवशं गतानां मदोन्मत्तानां हिंस्रात् शार्दूलाद् अपि क्रूरतराणां केषाञ्चित् लोलुपताम् । ते खलु धर्ममोक्षौ जले निःक्षिप्यार्थकामावेव पुरुषार्थौ मन्यमानाः परानुत्सादयितुं नवं नवं मानववधोपायमाविष्कुर्वन्तो जगतीतले स्वकीयं गौरवं प्रकटयन्ति । अहो कालस्येदृग् महिमा यत्तेऽपि नरघातका विज्ञानवित्तमा इति सादरं जनैः स्तूयन्ते । एते खलु जना मूर्त्तिमन्तः कामाः, एतदपेक्षया किमन्वेष्टव्यमन्यदुदाहरणम् ।

कामपराहताः खल्वेते मोहमहार्णवे निमग्ना धर्मबुद्धिं विसर्जयन्तो जगदिदम् अकाण्डताण्डवलीलाचित्रं कुर्वन्ति । कश्चित् किल नरपतिर्विपुलं राज्यमधिकुर्वाण स्ततोऽप्युपरतिमलभमानोऽन्यद् राज्यं ग्रहीतुमवसरं प्रतीक्षते । यश्चेदानीं सार्वभौमः सर्वान् कामानुपभुज्य परितृप्तोऽन्यैरपि नृपतिभिरनिशं स्तूयमानो नान्यत् किञ्चित् कामयते इति विभाव्यमानोऽपि ततः समुच्चं स्वाराज्यं प्रार्थयते, तल्लब्ध्वापि प्रवृद्धतृष्णः सत्याभिधेयं ब्रह्मलोकमर्थयते । एवं प्रकारेणानादौ संसारे कदापि वासना नोपशान्तिमुपैति । साम्प्रतं तावदस्मद्देशीया अपि प्रायेण सर्वेऽर्थकामावेव पुरुषार्थत्वेनाऽङ्गीकुर्वाणा येन केनाप्युपायेन तावेव वशीकर्त्तुं सततं प्रयतन्ते । तथाहि यस्य विपुलं धनं काम्यं वाऽभितमस्ति, स यथेच्छमाचरन्नपि लोकैः समाद्रियते, सत्यमपवादमपि अपावृत्य कल्पितगुणजातमर्थवादरूपमाकल्य तन्नाम्ना यन्त्या उत्सर्गीक्रियन्ते । यत्र कुत्रापि गम्यते केवलमेतयोः प्रभावः परिदृश्यते । अहो ! कामपराहता मूढाः कुमार्गमवलम्बमाना न वस्तुतत्त्वं परीक्षन्ते, न धर्मं विगणयन्ति, न परलोकवार्त्तामालोचयन्ति न वाऽपवर्गकथामनुस्मरन्ति । यदि परं तेषां मनसि परलोकास्तिता प्रादुर्भवेत्, कर्मणः फलमवश्यम्भावीति ते विजानीयुः तर्हि कथमैहिकं सर्वं विनश्वरमिति जानाना धर्मसंपवर्गञ्च विसर्जयितु मुत्सहन्ते ।

अहो बत ! कष्टां खलु दशां मापन्नाः साम्प्रतं पण्डितम्मन्याः । ते खलु नास्तिक्यवादेन जनानां चेतसि मोहबीजं प्रक्षिप्य पुनःपुनर्विषयसेवनसलिलेन सम्वर्द्धयित्वा घोरं कष्टतरं नरकं लब्धुमभिलषन्त कण्टकाकीर्णं तन्मार्गमाश्रयन्ति । कालस्य कुटिलपरिवृत्त्या पूतस्य भारतस्य कीदृशी दुर्दशा सञ्जाता । यत्र तावदेकदा ब्राह्मणाः सर्वान् कामान् तृणीकृत्य रहसि समासीनाः सततं परमात्मचिन्तायां कालमनयन्, सम्राडपि निरपेक्षान् तानपेक्षमाणः स्तुतिनमस्कारफलपुष्पोपहारैरर्चयामासुः, साम्प्रतं तेषामेव मुनीनां वंशधरा विद्वांसो भूदेवा धनिभिरपरैश्चोपहास्यन्ते । अपि च शिखातिलकधारिणो मुण्डितमस्तका स्ते केवलं धनलाभाय एवंरूपतामापन्ना इति वदन्तस्ते स्वकीयां सुशीलतां प्रकाशयन्ति । यदि नाम ते धर्मस्य महिमानं विजानीयुस्तर्हि कथमेवंविधे मोहपारावारे निमग्नास्तन्मयं जगन्निरीक्षेरन् । यतस्ते दर्शनीयं सुवेशं पुरुषं विलोक्य स्तुतिवादैरभिनन्दन्ति, हेलया तृणीकृतविलासवैभवान् तपसाखिलीकृताखिलकल्मषान् विद्याविनयवतो भूदेवान् समागतान् दृष्ट्वा किमिति व्याघ्रो वा वृको वा सिंहो वेति विचिन्त्य ते नालपन्ति, विविधै रवज्ञावचनै र्वा तान् अपसारयन्ति । महान् खलु विरोधः कामेन सह त्यागस्येति दिवसे रविकिरणान् असहमाना उलूका इव एते कामिनस्त्यागव्रतधारिणो महात्मनो ब्राह्मणान् द्रष्टुमपि न क्षमन्ते । यो हि यादृशमुपनेत्रं नीलं वा पीतं वा लोहितं वा नयनयो र्धारयति स खलु तन्मयमेव जगन्निरीक्षते, न च विवेक्तुं क्षमते । अतः साम्प्रतं प्रायेण सर्वैर्धनमाद्रियते न ज्ञानं, रूपमभिमन्यते नाभिजात्यं, भूषणमभिनन्द्यते न वस्तुतत्त्वं, किं बहुनोक्तेन शरीरिणी वासनापिशाची सर्वत्र नृत्यतीव । यदि कश्चिदेतस्मात् परित्राणमिच्छेत् तदा सर्वात्मना तदुच्छित्तये यतेत । यदाश्रितो हि कामस्तदुच्छित्तौ क्रियमाणायां तद्वृत्तिनिवृत्तिरवश्यम्भाविनी, नान्यथा । चित्तं हि कामादेराश्रयोऽतो येन केनाप्युपायेन तन्निरोधः सम्पादनीयः । चित्तवृत्तीनां सर्वासां निरोधे जाते योगः समुत्तिष्ठते, तेन च ज्ञानमुपावर्त्तते, ततश्च सर्वकामविनिवृत्तिरपुनरावृत्तिरूपा मुक्तिश्चोपजायेत ।

अतश्चित्तशुद्धयेऽष्टाङ्गस्य योगस्य परिशीलनं कार्यम् । तस्यादिमो यमः । तदुक्तं भगवता पतञ्जलिना,—“अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः” इति । ब्रह्मचर्य्यं नाम वीर्यधारणं कायेन मनसा वाचा चेन्द्रियधारणमिति यावत्तत्प्रतिष्ठायां कामो विनिवर्त्तते, कामश्च ब्रह्मचर्यविघातक इति स्मर्यते, अतो यत्नेन स निराकर्त्तव्यः । तदुक्तं भगवता मनुना,—

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥" इति

कामस्यानुपशान्तौ योगप्रथमभूमिकायां ब्रह्मचर्यप्रतिष्ठायामुपावर्त्तनमसम्भवि, तदभावे तत्त्वजिज्ञासा दूरापास्ता, का कथाऽपवर्गस्य । कामे च विषये समुपवर्त्तति तत्र प्रतिकूलभावना कार्या । अयमेव मुख्योपायः कामोच्छित्तेः । यदा खलु काचिद् हावभावकुशला कमनीयेव शशाङ्ककला खेलत्खञ्जननयना सौदामिनीनिभकचपाशा मृणालभुजा मरालमन्थरगमना कुवलयाभ्यां जगदालोकयन्तीव नयनाभ्यां मनोहरमापिबन्तीव लोचनपथमापतति, तदा तां पश्यन् कामोपहतचेतास्तामाप्तुमिच्छन् तत्स्वरूपं विचार्य झटिति ततो निवर्त्तेत । स च विचार एवं प्रकारः । इयं खलु मांसमयी चर्मपुत्तलिका रक्तश्लेष्मलालामलमूत्रपात्री तथापि मधुरिमाणं धारयन्ती नितरां मां मोहयति; कथमेतस्यां मरुमरीचिकाकल्पायां कामपिशाचिकायां मे मतिः सततं धावति, कुत्सिते काले गते सेयं न तथा चेतो विनोदयिष्यति । तथा च—

मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ।
स्नाय्वस्थिग्रन्थिशालिन्याः स्त्रियाः किमिव शोभनम् ॥
त्वङ्मांसरक्तबाष्पाम्बु पृथक्कृत्य विलोचने ।
समालोकय रम्यञ्चेत्, किं मुधा परिमुह्यसि ॥

इत्यादिकं कामनिवृत्तिकरं वाशिष्ठादिवचनजातं पुनः पुनर्मनसि परिशीलनीयम् । तेनैवोपायेन कामव्याधिरुपशमनीयः । इयमेव कामव्याधेर्महती चिकित्सा अयमेव महामन्त्रजपः कामपिशाचिकाताडनाय । तथा कलञ्जभक्षणादौ वेदोक्ते भोजनालये सज्जीभूतानां मांसादीनामाहारे चेत् चेतो धावति तदा तेषामपि भक्ष्याणां वक्ष्यमाणौ गुणदोषौ विवेक्तव्यौ । किमिदं रोगैकनिदानं जातिनाशकरं भोज्यम्? कथमत्र मे चेतो रमते, यतोऽहं ब्राह्मणात्मजः सर्वथाऽभक्ष्यमिदमिति एवं बहुधा विचार्य्य झटित्येवोपरन्तव्यम् । एवं सर्वेषु विषयेषु दोषदृष्टिर्विधेया । एतेन ये तावन्मद्यमांसादिभिः साध्यते मुक्तिरुपादातव्येति मन्यन्ते, तेऽपि निरस्ता वेदितव्याः । भवतु नाम तैः कथञ्चित् सिद्धिलाभो मुक्तिस्तु न भवतीति ब्रूमः ।

ये तावदर्थकामावेव पुरुषार्थौ मन्यमानास्तावेव समुपासते न धर्ममपवर्गं वा न संसेवन्ते, ते पिपासवः सन्तः पुरतः स्वादुसलिलां भागीरथीं विहाय

गोष्पदोदकेन तृष्णां निवारयितुमभिलषन्ति । न चार्थकामौ पृथक्तया पुरुषार्थौ धर्मान्तःपातिनौ हि तौ । धर्मेऽनुष्ठीयमाने नान्तरीयकतया तौ प्रादुर्भवतो न तदर्थः पृथक् प्रयत्नो विधेयः । यथोदकार्थं कुल्यायां क्रियमाणायामर्थात् स्नानाचमनादि कार्यं भवति तद्वदत्र मन्तव्यम् । कथं तर्हि शास्त्रे तयोः पुरुषार्थत्वमभिहितम्? चत्वारः पुरुषार्था इति वा कथं सङ्गच्छते? उच्यते, सत्यं चत्वारः पुरुषार्थाः शास्त्रे व्युत्पादिताः पुरुषैरर्थ्यन्ते काम्यन्ते इति निर्वचनात्, तथापि न तत् शास्त्रतात्पर्यविषयीभूतम् । शास्त्रं हि लोकबुद्धिमनुसरत् तयोः पुरुषार्थत्वं प्रतिपादयामास, लोके यज्ज्ञायते न तत् शास्त्रगोचरतामासाद्यते । अर्थकामावभीप्सितौ चेद्धर्माधीनतया सेवितव्यौ इति शास्त्रमुपदिशति न यथेच्छं धनं काम्यं वोपादातव्यमिति ।

तथा च विनश्वरे संसारे शाश्वतं पदं कामयमाने द्वावेव पुरुषार्थौ धर्ममोक्षाख्यौ सर्वैरुपादातव्यौ । मोक्षस्यातिगहनत्वात् स्वल्पधियाऽनायासेनाऽप्राप्यत्वाच्च प्रागेव धर्मोऽनुष्ठातव्यः । स च वर्णाश्रमानुगतः श्रुतिस्मृतिसम्मतो न यादृच्छिकः साम्प्रतिकः पुरुषमतिप्रभवो वेति न विस्मर्तव्यम् । स चानुष्ठीयमानः कामादिं समूलघातमुपहत्य चित्तशुद्धिं सम्पाद्य ज्ञानञ्च जनयित्वा मोक्षाख्यमतिदुर्लभफलं दास्यतीति नास्ति कश्चिद् विचिकित्सालेशः ।

किं न स्मर्यते पुरा किल भगवान् त्रिपुरारिर्नयनवह्निना कामं ददाह । अपरे च बहवो महर्षयो योगेन तपसा च सर्वान् कामान् खिलीकृत्य तद्विष्णोः शाश्वतं परमं पदं लेभिरे। तथाच श्रुतिः—"न जायया न प्रजया त्यागेनैकेऽमृतत्वमानशु-" रिति । त्यागेनैव कामादेरुच्छेदो न भोगेन । यो हि नाम उपभोगेन कामोपशान्तिं मन्यते स मृणालतन्तुना मदमत्तं करिवरं बद्धुमिच्छति, उडुपेन सागरमुत्तरीतुमभिलषति । अपि च स चन्दनतरुभ्रान्त्या दुर्विपाकं विषद्रुममाश्रयति, मरकतमणिरिति वह्निकणिकामुपादत्ते, धर्मपत्नीति शवबनितामाश्लिष्यति सुरभिकुसुममालेति तीक्ष्णधारं निस्त्रिंशमालिङ्गति । तथा च सुष्ठूक्तं भगवता मनुना—

> न जातु कामः कामानामुपभोगेन शाम्यति ।
> हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥

यद्यप्यत्र भगवतोपभोगेन कामो न शान्तिमुपैति इत्येतावन्मात्रमभिहितं, न च शान्तेरुपायः प्रदर्शित स्तथापि नैष उपायः कोऽसाविति जिज्ञासायां तदुपायः समासेन व्युत्पादितस्ततो नासङ्गतिरिति शम् ।

श्रीश्रीकृष्णतत्त्वविमर्शनम् ।

अथ श्रीश्रीकृष्णतत्त्वविमर्शनम् । तत्रादौ च इमे श्लोका अभिधीयन्ते यः स्वयमित्यादयः ।

यः स्वयं भगवान् योऽसौ सर्व्वशक्तिसमन्वितः ।
जन्माद्यस्य यतोभूतं स प्रभुः कृष्णसंज्ञितः ॥
ब्रह्मणोहि प्रतिष्ठासौ सच्चिदानन्दविग्रहः ।
स एव स्वांशरूपेण प्रतिभूतमवस्थितः ॥
तं प्राप्तुमीहते जीवोऽविद्याविमोहितोऽपि सन् ।
स चेप्सिततमस्तेषां प्रेमलभ्यः परोमहान् ॥
पराऽपराविभेदाच्च द्वे तस्य प्रकृती मते ।
एताभ्यामेव स द्वाभ्यां निखिलं सृष्टवान् जगत् ॥
ह्लादिनी या परा प्रोक्ता नन्दिनी राधिका हि सा ।
तद्युक्तः परमानन्दो रमते रमणोविभुः ॥
मधुरान्मधुरास्वादो राधामधुरतामयः ।
रसः स, तं निपीयैव जीवः सर्व्वातिगो भवेत् ॥

जन्माद्यस्य यतोभूतमित्येतेन परमेश्वरे श्रीकृष्णे प्रमाणं दर्शितं भवति । न च किं तत्र प्रमाणमिति वाच्यम् कार्य्यस्य जगतः कर्त्रनुसन्धानादेव तस्यानुमानात् कार्य्यस्य घटस्य कर्त्रनुसन्धानात् कुम्भकारानुमानवत् । चेतनाधिष्ठानमृतेऽचेतनप्रकृतेर्विश्वसम्भवो न सम्भवतीति निरीश्वरसांख्यमतमत्र निरस्यते । यत्तु "दृष्टं च अचेतनं चेतनानधिष्ठितं पुरुषार्थाय प्रवर्त्तमानं, यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते, यथा जलमचेतनं लोकोपकाराय प्रवर्त्तते, तथा च प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यतीति, तदसङ्गतम् । श्रीभगवदनुशासनादेव जगदभ्युदयसाधकतत्तद्द्रव्यसम्भाराणामभ्युपनयात् । श्रीभगवदनुग्रहेणैव जननीस्तनेषु क्षीरं प्रवर्त्तते, वायुर्व्वहति, सूर्य्यस्तपति, मेघो वर्षति, धरणी विविधशस्यशालिनी भवति चेत्यर्थः । ततश्च श्रुतौ "भयादस्याग्निस्तपति भयात्तपति सूर्य्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥" इति । "यदिदं किंच जगत् सर्व्वं प्राण एजति निःसृतम्, महद्भयं वज्रमुद्यतम्" इत्यत्र च "यथा वज्रोद्यतकरं स्वामिनमभिमुखीभूतं दृष्ट्वा भृत्या नियमेन तच्छासने वर्त्तते, तथेदं चन्द्रादित्यग्रहतारकादिलक्षणं जगत् सेश्वरं नियमेन क्षणमप्यविश्रान्तं वर्त्तते"

इति शाङ्करभाष्ये । तच्चैतदप्युक्तं कौशलमयं जगच्चेतनानधिष्ठिताचेतनसमुद्भवम् । चेतनवदचेतनमपि कौशलानां समुद्भावने समर्थं चेत्तर्हि चेतनाचेतनयोर्भेदावगतिर्नस्यात् । अतः ईश्वरः स्वीकर्त्तव्यो भवति । ततश्च श्रीगीतायां "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद् विपरिवर्त्तते ॥" श्रीभगवता श्रीमुखकमलेनोक्तम् । ननु किमत्र कौशलं यत ईश्वरः स्वीकर्त्तव्यो भवति, इति चेद्रास्तां तावद् विश्वस्य वार्त्ता, शरीरस्यन्त्रमेवादौ निरीक्ष्यतां सम्यक् । तत्र तत्तत् कर्म्मनिर्व्वाहणानां विविधयन्त्राणां श्रोत्रनासिकादीनां च प्रयोजनीयानां सर्व्वेषां यथास्थानविन्यासनिरीक्षणेन सर्व्वाधिदर्शी परमशिल्पी परमेश्वरः स्वीकरणीयो भवति । ननु अव्यक्तं पुरुषसंयोगाच्चेतनावदिव भवति अतः प्रकृतिपुरुषसंयोगनिमित्तः सर्ग इत्युच्यते चेत् पुरुषस्य निष्क्रियत्वस्य प्रकृतेः स्वतः परिणामस्य वा का गतिर्भविष्यति ? अयस्कान्तमणिवदिति दृष्टान्तस्य लौहाकर्षणे चौम्बकशक्तिकेन्द्रस्थानस्य अयस्कान्तस्यापि व्यापारवत्त्वान्नैव साधुः । अन्धपरिचालने पङ्गुरपि सव्यापारस्ततः अन्धपङ्गुन्यायोऽपि नैव सम्यक् । वस्तुतश्च द्वयोर्मिश्रणाद् यत्र कार्य्यमुत्पद्यते, तत्र द्वावेव सव्यापारौ भवतः । एवं चेत् पिशाचानां पतृभ्रातृवद् बहूनां पुरुषाणां विविधविरुद्धव्यापारसन्निवेशाच्चराचरमिदं नश्यतिस्मेति अवश्यं सर्व्वनियन्ता परमेश्वरः स्वीकार्य्यो भवति । अचिन्त्यशक्तिविभवे च तस्मिन् परमेश्वरे सर्व्वसद्भावात् "बद्धमुक्तयोरन्यतराभावाच्चास्य स्रष्टृत्वमित्यपि न वक्तव्यम् । करुणामयेनापि सता ईश्वरेण कथं दुःखसृष्टिः कृतेति चेत् दुःखं जीवानां स्वकर्म्मानुयायीति ब्रूमः । अपिच अपारज्ञानपारावारस्य परमेश्वरस्य सर्व्वकर्म्मतात्पर्य्यमस्माभिरल्पबुद्धिभिः बोद्धुं नैव शक्यते । तत्र अज्ञानानुधावितबुद्धितात्पर्य्यस्य बुद्धिमत इव ईश्वरस्य सत्तास्तीति बोध्यम् ।

ननु अस्ति घटनिर्म्माणे कुम्भकारस्य दण्डचक्रादिसाधनं, विश्वनिर्म्माणेऽस्य तु तादृशसाधनाभावाच्च स्रष्टृत्वमिति चेत् न सर्व्वशक्तिमत्त्वेन सर्वज्ञत्वेन च तस्मिन् सर्व्वसद्भावात् । शक्तिमत्तादौ प्रमाणन्तु विश्वस्यपदार्थजातानां कुत्राप्यवश्यं विश्रान्तिस्वीकाराद् भगवति शक्तिमत्तादिसमन्वयः । विश्रान्तिर्यथा—अयं ज्ञानी, अतोऽप्ययं, अतः पुनरेव एवं क्रमेण यत्र ज्ञानस्य विश्रामः, स श्रीभगवान् इति । एवं शक्तिमत्त्वादावपि बोध्यम् । तर्हि जगति यानि कानिचित् सन्ति, तानि यत्र चरमोत्कर्षं लभन्ते, स परात्परः परमपुरुषः श्रीश्रीकृष्णनाम्नाभिधीयते । एवमुत् कर्षचरमस्थानत्वेनैव एष श्रीश्रीकृष्णः परमानन्दघनो निरतिशयकरुणामयो निखिलकल्याणगुणनिधानं असीमज्ञानसिन्धुः परमशोभनश्च ।

नन्वेवं सुखवन्निरतिशयं दुःखमपि तस्येति चेदुच्यते सुखं दुःखं, ज्ञान-
मज्ञानं, उत्तममनुत्तमम्, आलोकस्तमश्चेत्यादिभिर्जगतोऽस्य द्वन्द्वात्मकत्वाद्द्व-
यात्मकत्वम् ।

तथा च ।

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥
एतद्योनीनि भूतानि सर्व्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥"

इति श्रीभगवदुक्तेरपि तस्याःपरापरेति द्वे प्रकृतीइति प्रतीयते । भूमिराप इत्यत्र च सर्व्वेषां मूलप्रकृतिकार्य्याणामुद्देशात् सांख्योक्तमूलप्रकृतिरेवापरा प्रकृतिरिति बोध्यम् । एतद्योनीनीत्युक्तेश्च जगतोऽस्य द्वयात्मकत्वमपि सिध्यति । ततश्चैव विश्वस्य पदार्थजातमल्पाधिकगुणदोषैः संसृष्टम् । तथैवं जगतोऽस्य द्वन्द्वात्मकत्वेऽचेतनप्रसूतौ अपरायामेव दुःखादीनां विश्रामो ज्ञानादीनान्तु परात्मके श्रीभगवतीति । ननु तर्ह्यपराप्रकृतिः कृष्णातिरिक्ता ? इति चेदुच्यते तत्रापराप्रकृतिलक्षणम् । तत्रेति

तत्रापरा गुणमयी शक्तिः सदसदात्मिका ।
ततस्या स्पृशति तं नैव सूर्य्यस्य परिवेषवत् ॥

सूर्य्यस्यस्यापि परिवेषस्य सूर्य्यस्पर्शायोग्यत्ववत् ततस्यापराप्रकृतेस्तत्स्पर्शायोग्यत्वं नतु तदतिरिक्तत्वम् । ततश्च

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान् विद्धि नत्वहं तेषु ते मयि ॥

इति श्रीभगवदुक्तेः । तन्निष्ठप्रकृतिनिष्ठत्वात्, भावानां तन्निष्ठत्वं प्रकृतेस्तत्स्पर्शायोग्यत्वादेव तेषां तत्स्पर्शायोग्यत्वं चेत्यर्थः । तर्हि दुःखादीनामपरायामेव विश्रामतः श्रीभगवतो न दुःखमयत्वमिति । ननु यद्यपरा प्रकृतिः श्रीभगवतः शक्तिः स्यात् तदा शक्तिशक्तिमतोरभेदादग्नेर्दाहिकावत् श्रीभगवति सावश्यं स्यास्यतीति चेन्न अग्नेर्धूमवदविद्याशक्तेर्बहिरङ्गत्वात्, तथाहि परिखायां राजभवनस्याङ्गभूतायामपि यथा परिखेयं राजभवनमिति वदन्ति, तथा

श्रीभगवान् तमसः परस्तादिति । तथा च "वेदाहमेतमजरं पुराणमादित्यवर्णं तमसः परस्तात्" इतिश्रुतौ । अथापरालक्षणानन्तरं परालक्षणमपि वक्तव्यमिति प्रोच्यते परेति ।

परानाम्नी तस्य शक्तिश्चिदात्मिका सनातनी ।
विवस्वतः प्रभायच्च सैवैषा तस्य विग्रहः ॥
भिद्यते सा महाशक्तिस्त्रिधा वृत्तिप्रभेदतः ।
ह्लादिनी सन्धिनी संविदेतास्तिस्रश्च वृत्तयः ॥
प्रेमानन्दात्मिका चाद्या सन्धिनी च सदात्मिका ।
संविच्चिदात्मिका सोऽतः सच्चिदानन्दविग्रहः ॥

यथा खलु प्रकाशादिवृत्तियुक्तघनीभूतप्रभैव सूर्य्यस्य स्वरूपं तथा ह्लादिन्यादिवृत्तियुक्तपरैव श्रीकृष्णस्य स्वरूपम् । मम प्रकृतिरित्यत्र तु स्थायिभावस्यैव रसरूपत्वेऽपि शृङ्गाररसस्य स्थायिभावो रतिरितिवत् षष्ठीविरोधः । तर्हि सूर्य्यावलम्बिनी प्रभेव श्रीभगवदवलम्बिनी परेति प्रतीयते । एतेन च एवं निरूपितं भवति यथा—

सच्चिदानन्दरूपोऽसौ विवस्वानिव शोभते ।
ब्रह्मैव हि करस्तस्य परिवेषोऽपरा तथा ॥

ब्रह्म परब्रह्म । तच्च विलासवर्जितपराशक्तिरेव । तत्र स्त्रीक्लीबव्यवहारस्तु "नैव स्त्री न पुमानेष न चैवायं नपुंसकः" इति श्रुतेर्न विरुद्धः । कुत एतदैक्यमिति चेदुभयोरेव प्रकाशसादृश्यादिति । तथाहि "ब्रह्मणोहि प्रतिष्ठाहम्" इत्यत्र "हि यस्मात् ब्रह्मणोऽहं प्रतिष्ठा प्रतिमा, घनीभूतब्रह्मैवाहं, यथा खलु घनीभूतप्रकाश एव सूर्य्यमण्डलं तद्वत्" इति श्रीश्रीधरस्वामिपादोक्तेन ब्रह्मणोऽपि प्रकाशसादृश्यम् । ततश्च "यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा इति श्रीचैतन्यचरितामृते । तनुभा अङ्गकान्तिः किरण इति यावत् ।

नच "नास्ति परब्रह्मणः परतरं तत्त्वं कृष्णस्तु तदवरः सगुणत्वात्" इति वाच्यम् श्रीकृष्णस्यैव परतत्त्वत्वात् सर्व्वोत्तमत्वाच्च । तथाहि "अक्षरं ब्रह्मपरमम्" इति श्रीमति गीताशास्त्रे परब्रह्मलक्षणं दृश्यते, तदनु

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इति पुनस्तद्वचनात् श्रीभगवानेव परब्रह्म परः पुरुषोत्तमोऽपि। ननु परब्रह्मपरत्वेऽप्यस्य कथमर्जुनेन "परं ब्रह्म परं धाम" इत्यत्र परं ब्रह्मेति व्याहृतमिति चेत् तत्रापि परं, ब्रह्मपरं धाम इत्येवोक्तमिति ब्रूमः। यत्र च परं ब्रह्म इत्येव दृश्यते, तत्र भानुर्भानुमानिति सूर्य्यस्येव, परं ब्रह्म, ब्रह्मपर इति श्रीभगवतः पर्य्यायद्वयमिति स्पष्टीकरिष्यामः।

नचैवं, "अक्षरात् परतः परः" इति श्रुतेः अक्षरपरात् श्रीकृष्णादपि परस्य कस्यचित् सत्ता स्वीक्रियते। तथाच

"तथापि निगमोवक्ति ह्यक्षरात् परतः परम्" इति वायुपुराणे इति वाच्यम्।

"मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय" इति श्रीभगवदुक्तेस्तदतिरिक्तपराभावात् ततश्च तत्रैव वायुपुराणे "केवलोरसः" इत्यनेन वेदव्यासप्रष्टैर्वेदैः शब्दाद्येकरसात्मकश्रीभगवत् स्वरूपस्येव तत्परत्वमभिहितं नतु तदतिरिक्तस्य कस्यचित्। श्रीभगवतो रसमयत्वं च महाभावपरिपुष्टरसराजावस्थत्वं श्रुतिस्मृतिपुराणादिषु सर्व्वत्रैव प्रसिद्धम्। तथाच

"भगवत् कृष्णरूपस्य ह्यानन्दैकरसस्य च"

इत्यत्र आनन्दैकरस इति पाद्मोत्तरखण्डे।

"वहद्गु षट्पदीस्थानं प्रकृत्या पुरुषेण च।

प्रेमानन्दमहानन्दरसेनावस्थितं यत्"॥ इत्यत्र प्रेमानन्दमहानन्दरस इति ब्रह्मसंहितायाम्। "अखिलरसामृतमूर्त्तिः प्रसृमरुचिरुद्धतारकापालिः कलितश्यामाललितो राधाप्रेयान् विधुर्जयति" इत्यत्र अखिलरसामृतमूर्त्तिरिति हरिभक्तिरसामृतसिन्धौ।

"स्वजनसुतात्मदारधनधामधरासुरथैः
त्वयि सति किं नृणां श्रयत आत्मनि सर्व्वरसे।
इति सदजानतां मिथुनतो रतये चरतां
सुखयति को न्विह स्वविहते स्वनिरस्तभगे"॥

इत्यत्र सर्व्वरसे इति श्रीमद्भागवते। एवं रसमयत्वादेव "रसो वै स, रसं ह्येवायं लब्ध्वानन्दी भवति" इत्यत्रापि रसशब्देन श्रीभगवानेवाभिधीयते। न विद्यते च एतद् भगवद्रसास्वादनादृते आनन्दानुभवस्यान्यः पन्थाः। लौकिकोऽप्यानन्द आभास एतस्यैवानन्दस्य। तथाच "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतौ। एतस्मादेवोक्तम् —

"मधुरान्मधुरास्वादो राधामधुरतामयः ।
रसः स, तं निपीयैव जीवः सर्व्वातिगो भवेत्" ॥ इति । श्रीभगवतो मधुरत्वं यथा—

"मधुरं मधुरं वपुरस्य विभो—
र्मधुरं मधुरं वदनं मधुरम् ।
मधुगन्धि मृदुस्मितमेतदहो
मधुरं मधुरं मधुरं मधुरम्" ॥ इति कर्णामृते श्रीभगवद्रसास्वादनाह्लादितस्य श्रीबिल्वमङ्गलस्योक्तिः । अपरस्य च श्रीभगवद्रसमग्नरसज्ञस्य श्रीप्रकाशानन्दाभिधभक्तस्यापि उक्ति र्वक्ष्यते यथा—

"कन्दर्पादपि सुन्दरः सुरसरित् पूरादहो पावनः
शीतांशोरपि शीतलः सुमधुरो माध्वीकसारादपि ।
दाता कल्पमहीरुहादपि महाखिन्धो जनन्या अपि
हा हा गौरहरिः कदा नु हृदि मे ध्यातः पदं धास्यति" ॥

इत्यत्रापि सुमधुरो माध्वीकसारादपीति श्रीभगवतो माधुर्य्यमेवोक्तम् । अत्रगौरहरिः श्रीनन्दनन्दन एव । श्रीराधामिलिताङ्गः श्रीभगवान् श्रीगौराङ्गनाम्नाभिधीयते । तथाच

"राधा कृष्णप्रणयविकृतिर्ह्लादिनी शक्तिरस्मा—
देकात्मानावपि भुवि पुरा देहभेदं गतौ तौ ।
चैतन्याख्यं प्रकटमधुना तद्द्वयं चैक्यमाप्तं
राधाभावद्युतिसुवलितं नौमि कृष्णस्वरूपम्" ॥

इति श्रीस्वरूपगोस्वामिकड़चायाम् । एवमत्र श्रीभगवत आनन्दमयत्वं सिद्धम् । ततश्चोपसंहारे तद्भजनमेवोपदिश्यते । सुविमल इति ।

"सुविमलसुखजाते जातु जाता यदीच्छा
सुमधुररसपाने कामना वा तदारे ।
विरसविषयभोगत्यागनिश्चिन्तचित्तो
भज खलु भजनीयं कृष्णमानन्दसिन्धुम्" ॥ इति

यतः खलु सकलातिशयमाधुर्य्यस्यानन्दरसरूपस्य श्रीभगवतो भजनास्वादनमृते नान्यत्त् सुखं विद्यते, ततः सर्व्वत्यागेन सर्व्वथा सर्व्वभावेन निश्चिन्तेन सता श्रीभगवानेव भजनीयः । इत्यस्य तात्पर्य्यम् ।

ॐ श्रीश्रीगौराङ्गचन्द्राय समर्पितमस्तु ॐ

(गुरुशिष्यसंवादे)

सदाचारविवेकः ।

शिष्यः—भगवन्तः ! अयमस्मि तावत् तत्रभवतां गुरुदेवपादानां श्रीचरणारविन्दद्वन्द्वे प्रणिपातनतशिरा, आचारपरायणतया कैश्चिदुपालब्धः। ते हि नाचारं कथमपि गणयन्ति। परन्तु आचारवतां सर्व्वेषेव पराजयैषिणा एव। तदयं सदाचारेषु तत्त्वत उपदेशेन तथा विधीयतां येन उपालब्धृगणः पराजीयेत।

गुरुः—वत्स ! नह्यस्माकमुपालम्भो नाम कश्चिदपि प्रतीयते आत्तवृत्तेरिति प्रणिहितेन श्रूयतां, काले पुनः पृच्छतां च। वत्स! प्रागुभवीयकर्म्मानुरूप्येणैव जीवनिवहा अहरहरेव जायन्ते कर्म्मफलानां सम्भोगाय, लीयन्ते च पुनः सम्भोगसमाप्ताविति विदितमेतत् सर्व्वेषाम्। अत्र च तावत्प्रवक्तव्यं विशेषत एवावशिष्यते। तथाहि पृथिव्यां ये स्थावरजङ्गमादयो भूतशब्दवाच्याः, तेषां मध्ये आहारविहारादिचेष्टासमर्था ये प्राणिनः ते श्रेष्ठाः, तेषां च ये बुद्ध्या जीवन्ति-हिताहिते विविन्चन्ति श्वशृगालादयः, ते हि घर्म्मेणोपतप्ताश्छायामुपसर्पन्ति शीतेनार्द्दिंताश्चातपम्। बुद्धिपूर्व्वकमेव निराहारं स्थानं त्यजन्ति। तेषामधिकतरा मनुष्याः, तेषां च ब्राह्मणाः, तेहि लोके पूज्यतमाः। तदपेक्षया च महाफलेषु यागादिष्वधिकारात् विदुषां श्रेष्ठम्। विद्वत्सु च कृतबुद्धयः—परिनिष्ठितवेदतत्त्वार्थाः। तेषामपि कर्म्मणामनुष्ठातारः। ते हि विहितकरणात् प्रतिषिद्धासेवनाच्च नोपपद्यन्ते। तेषामपि ब्रह्मविदः मोक्षलाभात्, इत्येवं रूपेण जायमानानां जीवानां यदुत्तरोत्तरं श्रेष्ठत्वं प्रतिपादितं मन्वादिभिस्तत्रचासाधारणहेतुराचारमूलः प्राक्पूर्व्वविशेष एव तदुक्तं मनुना २—य अध्याये—

> भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
> बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
> ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः ।
> कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः ॥ इति ॥

शिष्यः—देव ! अनुशिष्यतां तर्हि सदाचारतत्त्वं सविस्तारतया दासजनः।

गुरुः—प्रणिधीयतां शिष्येण प्रियतमेन। आङ्पूर्व्वात् चरेर्भावे घञ्प्रत्ययेन आचारपदसिद्धिः। आचार आचरणं अनुष्ठानमिति नार्थान्तरम्। सतां साधूनामाचारः सदाचारः। वेदस्मृत्यादिविहित इति यावत्। अनेनैव समेधते ह्यायुः स्वस्थता च देहस्येति।

शिष्यः—कोऽयं सदाचारो नाम ?

गुरुः—वत्स ! सिद्धान्तितमत्र च स्पष्टं काशीखण्डेन यथा—

> विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजाः ।
> विद्वांसस्तं सदाचारं धर्म्ममूलं विदुर्बुधाः ॥

अनेन देशविशेषमनन्तर्भाव्यैव केवलं विद्वेषरागादिराहित्येन द्विजानामनुष्ठेयस्य सदाचारत्वमभिहितं भवति । तं च सदाचारं धर्म्ममूलमिति पण्डिता जानन्ति । मनुना तु देशविशेषान्तर्भावेण उक्तम् । यथा—

> सरस्वतीदृशद्वत्यो र्देवनद्यो र्यदन्तरम् ।
> तद्देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
> तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
> वर्णानां सान्तरालानां सदाचारः स उच्यते ॥

ब्रह्मावर्त्तनामके देश एवादौ प्रायेण सज्जनानामाविर्भाव आसीदिति तेषां ब्राह्मणादिवर्णानां सङ्कीर्णतातिपर्य्यन्तानां य आचारः पारम्पर्य्यक्रमेणागतः, सांप्रतमपि वर्त्तमानः, स सदाचारः अभिधीयते । एतदनुगुणमेवोक्तम् कौर्म्मेण ।

> साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः ।
> तेषामाचरणं यत्तु सदाचारः स उच्यते ॥ इति ॥

वत्स ! प्रक्षालितपाप्मतया निर्म्मलचित्ताः सच्छब्दवाच्याः साधव उच्यन्ते इति तेषामाचरणं सदाचारवाच्यतां भजते । अयं च दीर्घजीवनहेतुतया स्वास्थ्यनिमित्तत्वेन च अवश्यपालनीयत्वाद्धर्म्मविशेष एव यदाह मनुः—१ । १०८ ।

> आचारः परमो धर्म्मः श्रुत्युक्तः स्मार्त्त एव च ।
> तस्मादस्मिन् सदायुक्तो नित्यं स्यादात्मवान् द्विजः ॥
> अपिच, महा-शान्ति-आपत्—१३२ । १५ ।
> आचारमेव मन्यन्ते गरीयो धर्म्मलक्षणम् ॥

इत्येताभ्यां मानवहितैषिणा महर्षिमनुना व्यासदेवेन च देशकालजात्यादिनिर्विशेषेण धृतिक्षमादिदशकानां साधारणधर्म्मत्वमभिधाय धर्म्मविशेषप्रतिपिपादयिषया सदाचारएव गरीयस्त्वेन स्वहस्तितः ।

शिष्यः—देव ! कथितेनोपदेशजातेनैतदेव मे प्रतिभाति यत् सदाचाराणां वेदस्मृतिमूलकत्वमिति सदैव सदाचारशालिना भवितव्यमिति । अत्र पुनरत्रेति

मे जिज्ञासा—सदाचाराणां वेदस्मृतिमूलकत्वे यत्र श्रुतिस्मृतिवाक्यानि न सन्ति तत्र का गतिरित्युपदिश्यतां देवेन ।

गुरुः—साधु पृष्टमायुष्मता । वत्स ! आचारो व्यवहारः-अनुष्ठानमिति मेधातिथेर्व्याख्यानबलेन एवं सिद्धान्तः पर्य्यवस्यति । यत्र साक्षात् श्रुतिस्मृतिवाक्यानि न सन्ति, शिष्टाश्च धर्म्मबुद्ध्यानुतिष्ठन्ति तदपि वैदिकवत् प्रतिपत्तव्यम्—यथा विवाहादौ कङ्कणधारणादिमाङ्गलिकत्वेन यत् क्रियते । या च विवाहयिष्यमाणायाः कन्यायाः प्रख्यातवृत्तवतुष्टयादिपूजा देशभेदेन । एवं होलाकाद्याचरणादि । तदुक्तं सुस्पष्टतया स्कन्दपुराणे—

न यत्र साक्षाद् विधयो न निषेधाः श्रुतौ स्मृतौ ।
देशाचारकुलाचारैस्तत्र धर्म्मो निरूप्यते ॥

यत्र न निषेधा इत्युक्तेः श्रुतिस्मृत्योर्विरोधे आचारस्य न प्रामाण्यमिति गम्यते एतच्च विशेषेण पश्चाद्व्यक्तीभविष्यति । आचारस्तावद्देशभेदात् कुलभेदात् पुरुषभेदाच्च नानाविधः; किन्तु प्रातिस्विकरूपेण गणयितुमशक्यः । श्रुतिस्मृत्यविरुद्धः सर्व्वोऽपि सदाचारः धर्म्ममूलमतएवास्यात्याज्यत्वमुक्तम्—

देशानुशिष्टं कुलधर्म्ममग्र्यं स्वगोत्रधर्म्मं नहि संत्यजेच्च । एवं पित्राद्याचारोऽपि धर्म्ममूलतया ग्राह्यः—

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥ इति मनूक्तेः । अत्र "सतां मार्गम्" इति विशेषणात् पित्रादीनां कदाचारो न धर्म्ममूलमिति गम्यते । ततश्च षोडशीग्रहणाग्रहणयोः उदितानुदितहोमयो र्वैकल्पिकयोरिव पित्राद्याचारस्य प्रामाण्यं तदज्ञाने आत्मतुष्टेरिति द्रष्टव्यम् । तदयं निर्गलितोऽर्थः—यत्र श्रुतिस्मृतिद्वैधं सदाचारदर्शनेन शास्त्रार्थं निश्चित्य सद्भिराचरितमार्गेणाचरणं प्रथमः कल्पः । तदसम्भवे तु पित्राद्याचारदर्शनेन एकतरपक्षाश्रयणम् । तस्याप्यज्ञाने यथात्मतुष्टि स्तदेवाचरितव्यमिति । यत्र च साक्षात् श्रुतिस्मृती मूलं नोपलभ्येते एवं विरुद्धार्थेश्रुतिस्मृती वा नोपलभ्येते तत्रापि सदाचारस्य धर्म्ममूलत्वम् "न यत्र साक्षात्" इत्यादि स्कान्दात् । यत्र तु विरुद्धार्थेश्रुतिस्मृती उपलभ्येते तत्र न सदाचारः प्रमाणं, यथा दाक्षिणात्यानां शिष्टानां मातुलकन्यादिपरिणयाद्याचारः । स त्वनाचारोऽपि तद्वंशीयानां स्वल्पदोषायेति व्यवस्थापितं देशनिबन्धनत्वादाचारप्रामाण्यस्येति । यथा देवलः—

यस्मिन् देशे य आचारः न्यायदृष्टः सुकल्पितः ।
स तस्मिन्नेव कर्त्तव्यो न तु देशान्तरे स्मृतः ॥
यस्मिन् देशे पुरे ग्रामे त्रिविधे नगरेऽपि वा ।
यो यत्र विहितो धर्म्मस्तं धर्म्मं न विचालयेत् ॥

अयं भावः—आचारः व्यवहारः अनुष्ठानमित्यनर्थान्तरं पूर्व्वमेवोक्तम् । तथाहि परोक्षेष्वपि विषयेषु प्रत्यक्षवद्दर्शिनः स्ववंश्येष्वस्मासु स्नेहार्द्रहृदयाः परमर्षयो देशकालपात्रानुसारेणैव सर्व्वाण्यनुष्ठेयानि सम्यक् विचिन्त्यैव निर्णीतवन्तः । ते हि सर्व्वथैव सर्व्वदाऽस्माकं हितशंसिन एवासन्, कथमन्यथा परित्यक्तसर्व्वसुखवासना वनस्था अपि अहर्निशं शास्त्ररचनायां जीवनमतिक्रान्ताः । अतोऽस्माभिस्तत्तद्देशाद्युचितानि तत्तदनुष्ठेयानि नान्यथानुष्ठातुं युक्तानीति सदयं प्रोक्तवान् देवलो महर्षिः । तदन्यथा कृतेत्वाचारपरिपालनं दूरापेतं नाम, प्रत्युत कदाचारत्वेन अनायुष्यादिकमेवोत्पादयन्तीत्यनुभूयतामवहितचित्तैः ।

शिष्यः—धन्यो मूर्द्धन्यः शास्त्रधुरन्धराणां देवलो नामर्षिः । यदयं वाह्यविज्ञानान्तर्भावेनैवान्तर्विज्ञानप्रवणमपि शास्त्रं रोचनकृते जगतां प्रतिपादयामास । तद् यद् भवतु भगवन् ! उपदिश्यतामयमिदानीं सदाचारप्रयोजनं देवपादेन ।

गुरुः—वत्स ! यथाक्रममहं सर्वमेव विशदीकर्त्तुकामोऽस्मि । प्रथमं तावदाचारशिक्षाकालं मनुनोक्तं प्रदर्शयामि, यथा—

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः
आचारमग्निकार्य्यं च सन्ध्योपासनमेव च ॥ (मनुः २य ६९)

गुरुः शिष्यमुपनीय प्रथममेका लिङ्गे गुदे तिस्र इत्याद्याचमनान्तं शौचम्, आचारं गुर्व्वादीनां प्रत्युत्थानाभिवादनादिभिः, एवं अग्न्याधानम् । पूर्व्वां सन्ध्यामित्यादिना च सन्ध्याया उपासनं शिक्षयेत् । इत्यर्थः । एतेन शौचाचारयोर्हेतुहेतुमद्भावः प्रदर्शितः । अत्र च ब्रह्मपुराणीयव्याससम्मतिरपि प्रदर्श्यते—आयुष्यतः प्रत्ययदार्ढ्याय यथा-ब्रह्मपुराणे २२२ अध्याये—

बालः कृतोपनयनो वेदाहरणतत्परः ।
गुरोर्गेहे वसन् विप्राः ब्रह्मचारी समाहितः ॥
शौचाचाररतस्तत्र कार्य्यं शुश्रूषणं गुरोः ।
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना ॥
उभे सन्ध्ये रविं विप्रा तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्याद् गुरोरप्यभिवादनम् ॥

स्थिते तिष्ठेद् व्रजेद् याति नीचैरासीत चासीते ।
समिज्जलादिकं चास्य कल्यकल्यमुपानयेत् ॥ इत्यादि ।

उक्तेन हि प्रमाणजातेन एतदवसीयते यत् उपनयनानन्तर मेवाचारपालनस्यावश्यकत्वमस्तीति । वस्तुतः प्रागुपनयनकालात् बालत्वेन धर्म्मादिकार्य्येषु पित्रादीनां प्रतिनिधित्वमेवोक्तमङ्गिरसा यथा—

असमर्थस्य बालस्य पिता वा यदि वा गुरुः ।
यमुद्दिश्य चरेद्धर्म्मं पापं तस्य न विद्यते ॥ इति ।

वत्स ! श्रूयतामिदानीं सदाचारप्रयोजनं, यदाह ब्रह्मपुराणे २२२ अध्यायः

गृहस्थेन सदा कार्य्यमाचारपरिरक्षणम् ।
नह्याचारविहीनस्य भद्रमत्र परत्र वा ॥
यज्ञदानतपांसीह पुरुषस्य न भूतये ।
भवन्ति यः सदाचारं समुल्लङ्घ्य प्रवर्त्तते ॥

इत्यादिभिः सदाचाररक्षणस्य प्रयोजनीयतां प्रदर्श्य आचारहीनस्य त्रिवर्गसाधने गृहस्थस्यानधिकारितामेव प्रतिपादयति । अपिच वत्स ! सौन्दर्य्यादिभिर्लक्षणैः परिहीनस्येऽपि जनानां आचारपरिपालनपरतया सर्वसम्पत्तेरपि सम्भवतां प्रतिपादयता श्रीमता काशीखण्डेन दीर्घायुष्ट्वसर्व्वसुखित्वादिकंच स्पष्टमेव व्यवस्थाप्यते। यथा—

लक्षणैः परिहीनोऽपि सम्यगाचारतत्परः ।
श्रद्धावाननसूयश्च नरो जीवेत् समाः शतम् ॥

वसिष्ठस्मृतौ च—

आचारात् फलते धर्म्म आचारात् फलते धनम् ।
आचारात् श्रियमाप्नोति आचारो हन्त्यलक्षणम् ॥

आयुष्मन् ! पुरा किल सुकेशिनामानं कञ्चित् निशाचरं प्रति महर्षिभिः सदाचारस्वरूपविवरणायां यदुक्तं तदतीव मनोहरमित्युपदेशार्थमुदाह्रियते । यथा वामनपुराणम्—

धर्म्मोऽस्य मूलं धनमस्य शाखा, पुष्पं च कामः फलमस्य मोक्षः ।
असौ सदाचारतरुः सुकेशिन्, संसेवितो येन स पुण्यभोक्ता ॥

इत्यादिभिर्धर्म्म एव सदाचारस्वरूपत्वेन विनिश्चितः । उपलभ्यते च लोके धर्म्माद्याचरणशाली सदाचारवानिति व्यवहारः । स्वभावश्च तावज्जगज्जनानां धर्म्मार्थकाममोक्षाणामन्यतमावलम्बनमेव; नहि तदन्यतमानपेक्षया कश्चिदपि क्षणमपि तिष्ठतीति सर्व्वैरेव प्रत्यक्षीक्रियते। अतो ये राचारैरभिमतधर्म्मादिसिद्धिः

अवश्यम्भाविनी तेष्वनवरतं यत्नः कर्त्तव्य इति स्वस्ववर्णाश्रमोक्तधर्म्मानुष्ठानत एवाचारपालनं भवतीति तत्रैव शास्त्राणां तात्पर्य्यमवसीयते वक्तॄणां च । अतो वामनपुराण एव चातुराश्रम्यमुक्त्वा वर्णाश्रमपरित्यागरूपेऽनाचारे दोष उक्तः । यथा—

स्वानि वर्णाश्रमोक्तानि धर्म्म्याणीह न हापयेत् ।
यो हापयति तस्यासौ परिकुप्यति भास्करः ॥
कुपितः कुलनाशाय देहरोगविवृद्धये ।
यत्नांशु पतते तस्य नरस्य सदाचार ॥
तस्मात् स्वधर्म्मं नहि संत्यजेच्च, न हापयेच्चापि तथात्मवंशम् ।
यः संत्यजेच्चापि निजं हि धर्म्मं, तस्मै प्रकुप्येत दिवाकरश्च ॥

वामनपु० १४ अध्याये ।

प्रतीयतेतरामेभिर्वामनपुराणवचनै राचारदोषदूषितस्य वर्णाश्रमोक्तकर्म्मविशेषेष्वधिकारो दूरत एवापास्तः । तेन च ब्राह्मणादीनां मुख्यायां सावित्र्याद्युपासनायां च्युताधिकारभावात्तत्तदुपासनालम्बनो भास्करो देवः प्रकुपितोऽनर्थव्रातं आपादयतीति ।

शिष्यः—भगवन् ! महानयमनर्थोपातः सदाचारविलङ्घिनां प्रमाणीकृतः समधिगतसकलतत्त्वसारेण भवता । अहो कष्टम् ! अहो कष्टम् !

गुरुः—वत्स ! अवधीयतामत्रास्माकमभिप्रायः । आचारस्तावत् केवलमदृष्टफलकः । ब्राह्मणसर्व्वस्वमिदं यज्ञोपवीतं स्पृष्ट्वैव ब्रूमः यः कश्चित् कथंचिदप्यकामतोऽपि काकतालीयवत् सदाचारमन्वतिष्ठत् स एव प्रत्यक्षीचकाराचारस्य दृष्टप्रयोजनीयतां नाम । एवं विधेऽप्याचारे यदालस्यादितो विविधैर्व्याधिभिः पराभूतः सुदुःखितः परमल्पायुष्ट्वमेव लभते तत्तु कष्टतरं वत्स ! एतमेवोक्तं काशीखण्डे—

दुराचाररतो लोके गर्हणीयः पुमान् भवेत् ।
व्याधिभिश्चाभिभूयेत तथाल्पायुः सुदुःखभाक् ॥
अनध्ययनशीलं च सदाचारविलङ्घिनम् ।
अलसं च दुरन्नादं ब्राह्मणं बाधतेऽन्तकः ॥

अनाचारचरमफलमकालमृत्युरिति । इतोऽधिकं नास्ति दृष्टफलमतः सर्व्वात्मनैव सदाचारः परिपालयितव्यः । स च सदाचारः ब्राह्ममुहूर्त्तावधिशयनान्तकर्म्मसु शास्त्रदृष्ट्या प्रवर्त्तनमिति संगीयते वेदविद्भिर्मन्वादिभिरिति न प्रातिस्विकरूपेणोच्यते इति । वत्स ! समागतः सायंसंध्यायाः कालः निवर्त्ततामद्यात्रैवेति । (क्रमशः)

श्रीश्रीसरस्वत्यै नमः ।

संस्कृत भारती

भागः २, २य वर्षम्] १३२५ मितवङ्गाब्दस्य ४र्थांशे [संख्या २

श्रीश्रीमहिमा ।

१। यथाम्बयार्के च निशाकरे च, तारागणाढ्ये गगने विमेघे।
मेघे तथालम्बपयोधरे च, शक्रायुधाढ्ये च तडित्प्रकाशे॥

२। तथा सुवर्णे विमले च रूप्ये, रत्नेषु वस्त्रेष्वमलेषु भूमौ।
प्रासादमालासु च पाण्डुरासु, देवालयेषु ध्वजभूषितेषु॥

३। सद्यः कृते चाप्यथ गोमये च, मत्ते गजेन्द्रे तुरगे प्रहृष्टे।
वृषे तथा दर्पसमन्विते च, विप्रे तथैवाध्ययनप्रपन्ने॥

४। सिंहासने चामलके च विल्वे, छत्रे च शङ्खे च तथैव पद्मे।
दीप्ते हुताशे विमले च खड्गे, आदर्शविम्बे च तथा स्थिताहम्॥

५। पूर्णोदकुम्भेषु सचामरेषु, सतालवृन्तेषु विभूषितेषु।
भृङ्गारपात्रेषु मनोहरेषु, मृदि स्थिताहं च नवोद्धृतायाम्॥

६। क्षीरे तथा सर्पिषि शाद्वले च, क्षौद्रे तथा दधि पुरन्ध्रिगात्रे।
देहे कुमार्य्याश्च तथा सुराणाम्, तपस्विनां यज्ञकृतां च देहे॥

७। शूरे च संग्रामविनिर्गते च, स्थितौ मृते स्वर्गसदः प्रयाते।
वेदध्वनौ चाप्यथ शङ्खशब्दे, स्वाहा स्वधायामथ वाद्यशब्दे॥

८। राज्याभिषेके च तथा विवाहे, यज्ञे वरे स्नातशिरस्यथापि।
पुष्पेषु शुक्लेषु च पर्व्वतेषु, फलेषु रम्येषु सरिद्वरासु॥

९। सरःसु पूर्णेषु तथा जलेषु, सशाद्वलायां भुवि पद्मखण्डे।
वने च वत्से च शिशौ प्रहृष्टे, साधौ नरे धर्म्मपरायणे च॥

१०। आचारसेविन्यथ शास्त्रनिष्ठे, विनीतवेषे च तथा सुवेशे।
सुशुद्धदान्ते मलवर्ज्जिते च, मृष्टाशने चातिथिपूजने च॥

११। स्वदारतुष्टे निरते च धर्म्मे, धर्म्मोत्कटे चात्यशनाद्विरक्ते ।
सदा सपुष्पे च सुगन्धिगात्रे, सुगन्धलिप्ते च विभूषिते च ॥
१२। सत्यस्थिते भूतहिते निविष्टे, क्षमार्ज्जिते क्रोधविवर्ज्जिते च ।
स्वकार्य्यदक्षे परकार्य्यदक्षे, कल्याणचित्ते च सदा विनीते ॥
१३। नारीषु नित्यं सुविभूषितासु, पतिव्रतासु प्रियवादिनीषु ।
अमुक्तहस्तासु सुतान्वितासु, सुगुप्तभाण्डासु बलिप्रियासु ॥
१४। सन्मृष्टवेश्मासु जितेन्द्रियासु, कलिव्यपेतासु पतिस्थितासु ।
धर्म्मव्यपेक्षासु दयान्वितासु, स्थिता सदाहं मधुसूदने तु ॥
विष्णुसंहिता (११) ६६ अध्याये ।

श्रीश्रीवाणीस्तोत्रम् ।

सितकमलासनधृतपदकमले प्रोज्ज्वलकान्तिविमलविधुधवले ।
वेदपुराणसुशोभितहस्ते जय जय बुधजनजननि नमस्ते ॥ १ ॥
मातर्भारति भारतवर्षे तव महिमार्ज्जितकविकुलहर्षे ।
ज्योतिस्तव पदसरसिजजातं ज्ञानं नाम्ना यदिह ख्यातम् ॥ २ ॥
भानुकिरणमिव दिशि दिशि कीर्णं चक्रे दुर्म्मतितिमिरं दीर्णम् ।
धरणिनिवासा विस्मितनयनाः तव पदशरणागतजनशरणाः ॥ ३ ॥
धर्म्माधर्म्मौ नीतिरनीतिः कार्य्याकार्य्ये भीतिरभीतिः ।
एतत् सर्व्वं तव करुणातः बोद्धुमलं मनुजा इह मातः ॥ ४ ॥
त्वं मातर्मानवानां निखिलभयहरा सर्व्वबोधैकदात्री ।
देवी वाग्वादिनी त्वं सुरनरमहिता कोटिसूर्य्यप्रकाशा ॥
दुःखानामेकहेतुं जगति किल महामोहराशिं विधूय ।
सत्यानन्दं जनानां जननि जनयितुं प्रादुरासीत् कृपा ते ॥ ५ ॥
अन्तर्दधे मातरितः क्व ते दया येतद्बुधः पूर्व्वसमृद्धिकारणम् ।
अशेषदुःखैकनिदानमद्भुतं तमः किमेतत् प्रसृतं समन्ततः ॥ ६ ॥
मातर्वेयं यदिह शोच्यदशामिदानीं
प्राप्ता न किं त्वमपि पश्यसि धीस्वरूपा ।
किं चेतना उत जड़ा वयमेतदेव
हन्ताधुना कृतधियः परिचिन्तयन्ति ॥ ७ ॥